# शाश्वतकोशः

THE

## ANEKĀRTHASAMUCHCHAYA

OF

# SĀSVATA

*A lexicon of Sanskrit words*

Edited with Introduction discussing the Date of Sasvata, Critical Notes, Glossary of Words and एकाक्षरकाण्डः of another Lexicon named नानार्थरत्नमाला

BY

**Narayan Nathaji Kulkarni,** B. A., LL. B.

*Editor of* तर्कभाषा, काव्यालंकारसूत्रवृत्तिः *&c.*

Poona

ORIENTAL BOOK AGENCY

1929

# CONTENTS.


| | PAGES |
|---|---|
| Introduction | i |
| Opening verses | 1 |
| एकश्लोकगतनानार्थः (१–१'१३) | २ |
| श्लोकार्धगतनानार्थः (१'१४–'१९३ अ) | १५ |
| श्लोकपादगतनानार्थः (५९४–७३४, ७३'१–७८०) | ५३ |
| श्लोकार्धगतनानार्थाव्ययानि (७८१–७९३) | ६८ |
| श्लोकपादगतनानार्थाव्ययानि (७९४–८०४) | ६९ |
| Concluding verses (805–807) | 70 |
| नानार्थरत्नमालाकोशः (एकाक्षरकाण्डः) | ७१ |
| Notes to शाश्वत | ८० |
| ,, ,, नानार्थरत्नमाला | ८४ |
| Index शाश्वत | ८९ |
| ,, नानार्थरत्नमाला | १०३ |


*All rights reserved by the Publisher.*


PRINTERS

Text 1–40 pp. by Mr. **Saptarshi**, at the **Prabhakar Press, Poon**
,, 41–110 pp. by Mr. **Thakar** at the **Sidheshwar Press Kholhapu**
Introd. & Title by Mr. **Rajaguru** at the **Rajaguru & Co's. Poon**

Published by Dr. **N. G. Sardesai** L. M. & S.
*for the* **Oriental Book Agency, Poona.**

# INTRODUCTION.

"अनेकार्थसमुच्चय" of शाश्वत or "शाश्वतकोश," as it is generally known, was edited for the first time by Dr. Zachariæ, which was printed in 1882 and published in Berlin. A revised edition of it was brought out by the late Mr. K. G. Oak, in 1918. The present edition is an improvement on both these editions.

शाश्वतकोश is divided into six sections. In the first three sections the meanings of each word are given respectively in full, half and quarter verses. The fourth is a supplementary section of quarter verses and fifth and sixth deal with the indeclinables which are also arranged respectively in half and quarter verses. Except this division there is no other systematic arrangement in the कोश.

Unlike other कोशs, शाश्वतकोश moreover, is not a complete कोश but a खण्डकोश, the words being put together without any order like other कोशs, where words are generally arranged in the order of final consonents. No such order being adopted in this कोश, it goes very difficult to trace any word of which the meaning is to be ascertained. In the first edition the words of which different meanings are given in the verse were required to be searched after reading the whole verse and this task becomes the more difficult to the beginner when the word was either combined with another word under some Sandhi rule or was compounded with another word. I have in the present edition underlined the words whose different senses are given in the verses. So the reader at once catches the principal word in the verse and knows that the rest are its homonyms.

I have also taken precaution to give the number of senses of the word in numerical figures just after it, which is printed in the margin of the book just at the beginning or at the end of the verse in which its meanings are given. I am confident that these two new improvements would facilitate the understanding of the work better.

As regards the date of शाश्वत the late Mr. Oak has given conclusive proofs which I quote below in full :—

"As regards the age of शाश्वत, scholars are divided in opinion. Some assign him to the 12th century while others claim

for him a higher antiquity than that of the Amarakosa itself. क्षीरस्वामिन्'s commentary on the अमरकोश, which has been recently published, affords some clue to the age of this writer. Numerous quotations from शाश्वत's work given by क्षीरस्वामिन् enable us to ascertain the highest and the lowest limits within which शाश्वत can be placed. We have already given our reasons for assigning the अमरकोश to the fourth century ( 300—400 ); and since क्षीरस्वामिन् belongs to the 11th century, शाश्वत must be placed between the 5th and the 10th century. अमरकोश's priority to शाश्वत can be easily established from the following considerations—

(a) In commenting on क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्र साधुनि (Amara. II. 7. 33. ) क्षीरस्वामिन् says- अतिथय इदमातिथ्यं, अतिथेर्ण्यः सू० अतिथौ साधु-आतिथेयं, पथ्यतिथीति (सू०) ढक्। कात्यस्त्वाह-आवेशेकं विपाश्चिद्वैरातिथ्यमभिधीयते। अतिथ्योऽतिथिरागन्तुरिति च माला, शाश्वतोऽत एवोभयमाह-आतिथ्यं स्यादतिथ्यं आतिथ्यमतिथिं विदुः। In his remarks on काल्य (Amara I. 3. 2.) क्षीरस्वामिन् says- शाश्वतः कल्यमप्याह-कल्यं प्रभातं सद्यजं च कल्यो नीरोगदक्षयोः। In his comments on सुषिर ( Amara. I. 7. 1. ) क्षीरस्वामिन् says-शाश्वतस्तु निरवयवौ सुषिरसुषी मन्यते, यदाहुः-गर्ते गर्तान्विते वार्धविशेषे सुषिरं त्रिवु. It is evident from these that in the opinion of क्षीरस्वामिन्, शाश्वत was posterior to Amarasimha.

( b ) In the body of the कोश itself- अपिशब्देन साध्यन्ते पूर्वाचार्यानुसारतः।
विस्मृता ये प्रमादेन कथ्यन्ते तेऽधुना पुनः ॥ ( v.145 )

by the word पूर्वाचार्य, शाश्वत refers to Amarasimha. In the नानार्थवर्ग of अमरकोश, such passages as-जैवातृकः शशाङ्केऽपि, व्याघ्रेऽपि, पुण्डरीकं ना, देवशिल्पन्यपि त्वष्टा, रूप्यं प्रशस्तरूपेऽपि, और्वानलेऽपि पातालम्, केशेऽपि वृजिनः, यवान्यमपि दूषकः, चक्रं राष्ट्रेऽपि, स्वर्णेऽपि रा:, इ० are very frequent, and शाश्वत imitates Amara, in verses 736-780. Again शाश्वत who is prolix, and not succinct like Amara, copies the latter here and there. He borrows not only passages but verses and half verses from the नानार्थवर्ग of अमरकोश thus-

मात्रं कात्स्न्यें वधारणे ( शाश्वत 61 and Amara. III. 3. 179 )
योग्यभाजनयोः पात्रम् ( शाश्वत 400 and Amara. III. 3. 180 )
पश्चात्सादृश्ययोरनु ( शाश्वत 799 and Amara. III. 3. 249 )
पारोर्ध्यांजियतरोः शाल्वायामुपसर्गके ( शाश्वत 424 and A. III. 3. 97 )
भावः सत्तास्वभावाभिप्रायचेष्टात्मतन्मस् ( योनिषु ) (शाश्वत 48, A. III. 3. 208)
योगः संनह(वन)नोपायसंगतिध्यानयुक्तिषु ( शाश्वत 100, A. III. 3. 22. )
दिग्देशकाले पूर्वादौ प्राग्दक्षप्रत्यगव्ययम् ( शाश्वत 139 and A. III. 4. 28 )

दोषोत्पादेतुबन्धः स्यात्प्रकृत्यादिविनश्वरे । मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने ॥
(शाश्वत 65 and Amara. III. 3. 98-99)

This shows that Amarasimha was prior to शाश्वत.

We shall now proceed to show that शाश्वत was posterior to Chandragomin* and कालिदास, who belonged to the 5th century. In one of the opening stanzas—

दृष्टशिष्टप्रयोगोहं दृष्टव्याकरणत्रयः । अधीती सदुपाध्यायाल्लिङ्गशास्त्रेषु पञ्चसु ॥

शाश्वत says that he has studied three different grammars and five लिंगानुशासनs. One of the three grammars and one of the five लिंगानुशासनs, it may be inferred, must be that of Chandragomin. In the stanza वीणादीनां गुणस्तन्त्री तन्त्री दहसिरा मता ( v. 426 ) the word तन्त्री is given as ङीवन्त like नदी which is sanctioned by Chandra's उणादिसूत्र (I. 90), while according to पाणिनि's उणादिसूत्र (III.446), the word should be तन्त्रिः (Nom. sing.), So the word विश्राम in verse 54 is correct according to Chandragomin's grammar and not according to पाणिनि's grammar,‡

कालिदास uses the form ललामन् in कन्यालललामकमनीयमजस्य लिप्सोः ( R. V. 64 ), This form is not given by Amarasimha in III. 3. 143. शाश्वत notices both the forms ललाम and ललामन् in verse 80. कालिदास uses the word भित्ति in निर्यौतदानामलगण्डभित्तिः (R. V. 43 ) in the sense of प्रदेश which शाश्वत gives in verse 653. The noun सारङ्ग is generally used by कालिदास in the sense of 'an antelope or deer' and rarely in the sense of a *Chataka* bird. शाश्वत gives these two senses only in सारङ्गवेणचातकौ. जन्यामवदरुमारि ( R. VI. 30 ), is explained by शाश्वत thus-नवोढाया

---

* In the Introduction to the नामलिंगानुशासन of Amara with the comm. of क्षीरस्वामिन्, we have shown that Amarasimha was a Bauddha and preceded the Bauddha grammarian Chandragomin. An additional evidence of this fact is found in the verse—

खुरणाः स्यात्खुरणसः प्रजुः प्रगतजानुकः ।
ऊर्ध्वजुरूर्ध्वजानुः स्यात्संजुः संहतजानुकः ॥ (Amara. II. 6. 47)

According to Chandragomin the forms प्रजु, संजु, ऊर्ध्वजु, ought to be प्रज, संज, ऊर्ध्वज by the *Chandra Sutras* संप्राज्जानुनोर्डः and ऊर्ध्वाद्वा (IV 4. 119-120). The forms प्रज, संज, ऊर्ध्वज, given by Amarasimha are correct according to the *Panini Sutras* प्रसंभ्यां जानुनोर्जुं and ऊर्ध्वाद्विभाषा ( V. 4. 129–130.)

‡ See *Notes* to Prof. Pathak's Meghaduta, 2nd Ed. p. 83.

ज्ञातिभृत्या जन्याः स्निग्धा वरस्य च ( v. 58 ). From what is said above and from what शाश्वत says in one of the concluding verses ( अभिधानानि विविच्य ज्ञात्वा निखिलानि सुकविकाव्यानि । कृत्वा गुरुमभियोगं कोशोयं शाश्वतेन कृतः ) it will appear that he lived after Chandragomin and कालिदास *i. e.* after the fifth century.

As शाश्वत alludes to वराहमिहिर in the last verse ( महाबलेन कविना वराहेण च धीमता । सह सम्यक्परामृश्य निर्मितोयं प्रयत्नतः ॥ ) we shall not be far wrong, if we assign him to the end of the 6th and the beginning of the 7th century. This opinion is further confirmed by the fact that the feminine form खलिना ( v. 377 ), unknown to Amarasi*m*ha, actually appears in the लिंगानुशासन of शाकटायन who belongs to the 9th century. So also the senses of the words योग and क्षेम, viz. अपूर्वार्थसंप्राप्ति and लब्धार्थरक्षण, given by शाश्वत in stanzas 100 and 292, and not given by Amarasimha, are assigned to those words by शंकराचार्य who flourished in the 6th century, in his भाष्य on the भगवद्गीता ( IX. 22. )

On a comparison of शाश्वत's अनेकार्थसमुच्चय with Durga's कोष quoted by क्षीरस्वामिन् in his commentary on the अमरकोष we find that Durga not only borrows very often from but sometimes, improves upon शाश्वत. Thus-कूपीटमुदरे जले ( क्षीर-p. 194) is borrowed from शाश्वत 723 and उद्धस्थितः प्रतीहारे चरभेदे ( क्षीर-p. 200) from शाश्वत 539, वर्षाख्या लोकधातुश्च (क्षीर-p, 221) is an instance of शाश्वत's (v. 191 ) imitation by Durga. ऋतमुञ्छशिले सत्ये शोभनेपि विवक्षितम् (क्षीर-p.200) is an improvement upon शाश्वत 633, as well as पाशो बन्धनशस्त्रयोः (क्षीर-p. 220) upon शाश्वत 140. Amarasi*m*ha gives कोष ( पान्त ), while शाश्वत gives कोष ( शान्त ). Durga copies Amara in all the senses but follows शाश्वत in giving the word as शान्त ( see क्षीर,-p. 220 ) As क्षीरस्वामिन् in his commentary on the नानार्थवर्ग of Amarasi*m*ha gives the additional senses of शाश्वत, first after each word and quotes verses afterwards giving additional homonyms only from Durga, he considers शाश्वत to be prior to Durga. The latter may probably be a lexicographer of the 8th century."

## नानार्थरत्नमाला.

Part of this कोश was printed as an appendix of the शाश्वतकोश (Oak's edition) under the name of रत्नकोश, from an incomplete Ms. in the possession of the late Mr. Oak. He could not procure another complete Ms. of it and hence it was printed under a misleading title रत्नकोश found in the Ms. referred to above. There are several Mss. of रत्नकोश in the Bhandarkar Oriental Research Institute Poona, but they deal with either Vedanta or Tarka.

While going through the Mss. of the monosyllabic lexicons in B. O. R. I. I came across one Ms. (No. 759 of 86–92) which exactly tallied with the above referred to रत्नकोश. It is also an imcomplete Ms. in itself as it neither gives the name of the author nor any introductory verses, though it gives meaning of all letters beginning with अ and ending with क्ष. Another Ms. of the same lexicon was found out, through the courtesy of Vyankat Shastri of Bhandarkar Institute of Poona, in Grantha characters under the name नानार्थरत्नमाला. It is a complete Ms. and gives introductory verses and the name of author also. I have taken up in the present edition, the name and the introductory verses as they are, without any alteration. It has in all six काण्ड्स, containing lexicons of one, two, three, and four words, one of miscellaneous words, and one containing all indeclinable words. The Ms. being in Grantha character I am at the mercy of the transcriber. The whole of it could not be got transcribed in time. Mr. Vyenkat Shastri, however, was kind enough to transcribe the first काण्ड i. e. monosyllabic section which was badly needed for this edition. As the correct name of the कोश (नानार्थरत्नमाला) has been found and its contents are similar to the कोश named नानार्थार्णवसंक्षेप of केशवस्वामिन् (often quoted as केशव by मल्लिनाथ and अरुणाचल), I tried through Dr. N. G. Sardesai, L. M. & S., to find out if there be any such कोश as नानार्थरत्नमाला in Devanagri in the Bhandarkar Institute. To my great joy and surprise there did exist this कोश with the same name (No. 115 of 1883–1). It contains all the काण्ड्स excepting first काण्ड printed in the *infra*. With the help of these two Mss. (Granth and Devanagari) I have every hope of bringing out a correct and a complete edition in the near future.

### Author, his life and work.

The name of the author of this नानार्थरत्नमाला is इरुगदण्डेश which is told by the author himself in the third verse of the Introduction viz.

सोऽयं प्रभाति नानार्थरत्नमालां गुणोज्ज्वलाम् । श्रीमान्निरुगादण्डेशो नात्यल्पां नातिविस्तराम् ॥

He also tells in the same introduction that this monosyllabic lexicon is not the only work written by him. He has also composed lexicons of two, three, and four words; one of miscellaneous words and one containing all indeclinables cf.

काण्डैश्चतुर्भिरेकद्वित्रिचतुर्वर्णवर्णितैः । संकीर्णाव्ययकाण्डाभ्यामिह षट्भिरुक्रमात् ॥

This इरुगादण्डेश is known also as इरुगादण्डाधिनाथ, दण्डिनाथ, दण्डेश or भास्कर. He seems to be learned for he writes of himself as सरस्वत्याविलासमुकुरायते। (Introduction to 2). The verses which he composed are also lucid, clear and have an uninterrupted flow. His Guru's name is सीतारामं cf. सीतारामगुरुं च नौमि मनसा विद्वत्सभाधूर्वरम् ।

Nothing more of him is known for the present except that he was the son of Chaicha, minister of Bukka II and was appointed as a general by King Harihara II of विजयानगरम् who flourished in the second half of the 14th century. (Forgotten Empire p. 48).

इरुग seems to be his surname and दण्डिनाथ, दण्डेश, etc. seem to be his titles which mean general. Bhaskar seems to be his name. It is not quite impossible that, though he was a general, he could compose lexicons, for in former times Kings and their Officers were learned and could write on diverse subjects. It may be even, that he might have got this work written by some one ascribed to his name like many Kings and Officers of former times. But nothing can be said with certainty at this stage for want of full and authentic information.

## Some important points in settling the text.

I have taken the printed text in the first edition as the base and then compared the other two Mss. with it. I have spoken of the Ms. from the Bhandarkar Institute Poona, as B and Malayalam Ms. as M. When the version of the Mss. was found to be superior and giving a clearer sense than the original printed text, version of the Mss. was chosen as text in the place of original printed version. But where the orginal printed text was equally good and clear the version of the Ms. is given as a reading at the foot of the page. In this way there are nearly seven to eight places in the text where I have preferred the version of the Ms. to that of the original printed text. I shall cite one for example.

In the original printed text the meaning of the word 'म्न' were not given at all. In fact the word म्न could not be found and so

many senses of the word 'ज' were given. The meanings of 'ज' begin from the 26th verse in which meanings of जः are given; meanings of जा and जं will be found in the 27th verse. The first half of the 28th verse gives the meanings of जिः and the second half of the verse runs as follows:—जूः श्री वाण्यां जशब्दस्तु पुमान् धातरि हिंसके ।

It will thus be seen that the meaning of जः are given again in the 28th verse although they had been previously treated in the 26th verse as stated above, which in my opinion seems redundant. The above referred to line runs as follows in the M. Ms.:—

जूः श्री वाण्यां झशब्दस्तु पुमान् धातरि हिंसके ।

Thus it will be seen that M. Ms. reads झ for ज and this reading is preferable as there was no necessity of giving the meanings of ज again when they were already dealt with previously. And the lexicon would also remain so much incomplete if the word झ is altogether omitted from it. I have, therefore, replaced झ for ज in my text. I have in this way changed my text in seven to eight places but I have not changed a single word unless I had a support of either of the two Mss. for doing so.

In one place only, I have changed the serial order of the verses without any authority from either of the Mss. e. g.

स्वोऽश्री धने पुमाञ्ज्ञातौ त्रिष्वात्मीये स्वमात्मनि ॥७७॥
स्वरव्ययं च त्रिदिवं त्विट् कान्तिज्वालयोः स्त्रियाम् ।
वल्के लवंगवल्के त्वग् वाग्द्वारोपमयोः स्त्रियाम् ॥७८॥

(latter half of the 77th and 78th verse from my text). I think, however, that this change is quite essential for the following reasons :—

The above referred to verses were not in the original printed text. In fact the original printed text ends here abruptly as the further part of the Ms. from which it was printed, was torn and unintelligible. The B Ms. gives only later half of the 78th verse e. g. वल्के लवंगवल्के त्वग् वाग्द्वारोपमयोः स्त्रियाम् ।
and does not give the other two lines. M. Ms. only gives all the three lines. These three lines give meanings of the word स्व and स्वर्. Both B and M Mss. concur in giving these verses just after the meanings of त्विट् and before those of श.

If we read the whole of the lexicon the serial order of the vowels and consonents is nowhere broken. In this case only the

meanings of स्व come before the meanings of श्, ष्, स्. It appears a little bit strange. The meanings of स्व ought naturally to come after the meanings of श्, ष्, स्. as स्व is a conjunct consonent beginning with स्. The meanings of ज्ञ, which is made up of ज्, and ञ, are given after the meanings of ज्.

I have, therefore, changed the serial order of the verses for the reasons stated above, and placed these verses just after the meanings of स् and before those of ह्. This arrangement does not change the meaning but on the contrary serial order of the letters is kept intact.

I have also given in the margin the number of senses in numerical figures just after the word whose meanings are given in the verses and have also underlined those words in the verses.

The last and most pleasant work which is by no means a great task, that remains now is to offer hearty thanks to those who helped me in the work. The first and foremost person to whom I owe a debt of gratitude is Dr. N. G. Sardesai, L. M. & S, the enterprising Manager of the Oriental Book Agency, of Poona. This work would not have seen the light without his help and kind suggestions. I have, therefore, to offer hearty thanks to him. I have also to thank Mr. G. S. Sardesai of Kolhapur without whose aid the book would not have been brought out so quickly and correctly.

Buldana,

Dated 9th August, 1929. N. N. K.

अथ

श्रीशाश्वतप्रणीतः

# अनेकार्थसमुच्चयः

अथवा

# शाश्वतकोशः

श्रीगणेशाय नमः । ॐ नमः सरस्वत्यै ।
पाकोत्तीर्णसुवर्णवर्णरुचिरच्छायं वसानोम्बरं
भास्वत्कौस्तुभकान्तिकर्बुरपरिभ्राजिष्णुवक्षःस्थलः ।
शङ्खं चक्रमसिं गदामवितरं बिभ्रच्चतुर्भिः करै-
रारूढो गरुडं नवीनजलदश्यामो हरिः पातु वः ॥ १ ॥
पूर्वाचार्यप्रसादेन विदित्वा शब्दविस्तरम् ।
क्रियते शाश्वतेनायमनेकार्थसमुच्चयः ॥ २ ॥
स्फुटार्थपदविन्यासः शिशूनां प्रतिपत्तये ।
कृतोयं न प्रबुद्धानामतः क्षाम्यन्तु सूरयः ॥ ३ ॥
एष ज्ञानार्थमज्ञानां संतोषाय विजानताम् ।
श्रमो मम न तु ज्ञानलवगर्वितचेतसाम् ॥ ४ ॥
प्रसिद्धैरप्रसिद्धैश्च शब्दैरेष विनिर्मितः ।
प्रसिद्धैर्ग्रन्थितुं ग्रन्थमप्रसिद्धैश्च वेदितुम् ॥ ५ ॥
दृष्टशिष्टप्रयोगोऽहं दृष्टव्याकरणत्रयः ।
अधीती सदुपाध्यायाल्लिङ्गशास्त्रेषु पञ्चसु ॥ ६ ॥
अतः शब्दार्थलिङ्गेषु कर्तव्योऽत्र न संशयः ।
शब्दकोशेऽभियोगेन विद्वज्जननिरूपिते ॥ ७ ॥

शिव ३ शिवं भद्रं शिवः शंभुः शिवा गौरी शिवाभया । शिवा
शिवः कीलः शिवा क्रोष्टा भवेदामलकी शिवा ॥ १

बल ८ बलं शक्तिर्बलं सैन्यं बलं स्थौल्यं बलो बली ।
बलं रूपं बलो दैत्यो बलः काको हली बलः ॥ २

मधु ६ मधु मद्यं मधु क्षौद्रं मधु पुष्परसं विदुः ।
मधुर्दैत्यो मधुश्चैत्रो मधुकोपि मधुर्मतः ॥ ३

ध्रुव ६ ध्रुवः कीले (लो) ध्रुवं शश्वद् ध्रुवं तर्के ध्रुवो मुनौ । ध्रुवा १
ध्रुवो नित्ये निश्चिते च गीतिसुग्भेदयोर्ध्रुवा ॥ ४

शिखा ६ शिखा ज्वाला शिखा चूडा शिखा शाखा शिखा शिफा ।
शिखा शिखण्डिनां चूडा शिखा स्यादग्रमात्रकम् ॥ ५

घन ९ वाद्ये मुस्तेऽम्बुदे सान्द्रे घनः स्याल्लोहमुद्गरे ।
घनौ काठिन्यसंघातौ मूर्तिबाहुल्ययोर्घनः ॥ ६
( घनं सान्द्रं घनं वाद्यं घनो मुस्तो घनोऽम्बुदः ।
घनौ काठिन्यसंघातौ घनः स्याल्लोहमुद्गरः ॥ )

राम ६ रामा स्त्री जामदग्न्यश्च रामो रामौ सितासितौ । रामा १
रामः पशुविशेषोपि रामौ चारुहलायुधौ ॥ ७

पद्म ५ पद्मा लक्ष्मीर्निधिः पद्मः पद्मानि गजबिन्दवः । पद्मा १
संख्यानागविशेषौ च पद्मौ पद्मं सरोहरुम् ॥ ८

वसु ६ देवप्रभेदा वसवो वसुः किरणयोक्त्रयोः ।
वसु रत्नं वसु धनं वसु तेजो निगद्यते ॥ ९
( वसुमाहुर्हुताशनम् ॥ )

गोत्र ३ विश्वंभरा भवेद् गोत्रा गोत्रा गोनिकुर (रु) म्बकम् । गोत्रा २
नाम गोत्रं कुलं गोत्रं गोत्रश्च धरणीधरः ॥ १०

शुचि ६ शुचिरग्निः शुचिः शुक्रः शुद्धानुपहतौ शुची ।
उपधाशुद्धसचिव आषाढश्च शुचिर्मतः ॥ ११

अमृत ५ सुराणामन्नममृतममृतं स्यादयाचितम् ।
अमृतं यज्ञशेषेपि निर्वाणं वारि चामृतम् ॥ १२

निर्वाण ४ निर्वाणमस्तंगमनं निर्वाणं गजभञ्जनम् ।
निर्वाणमपवर्गेपि निर्वाणं निर्वृतिं विदुः ॥ १३

पुण्डरीक ४ पुण्डरीकं सितच्छत्रं पुण्डरीकं सिताम्बुजम् ।
व्याघ्रेपि पुण्डरीकः स्यात्पुण्डरीकश्च दिग्गजः ॥ १४ ॥

पालि ५ चिह्नमाहुर्बुधाः पालिं पालिः पङ्क्तिप्रदेश(भेद) योः ।
कर्णस्य ललिता पालिः पालिरश्रिरपि स्मृता ॥ १५

बहुल ३ एला गावश्च बहुला बहुलाः कृत्तिका अपि । बहुला २
बहुलः कृष्णपक्षो(क्षे)ऽग्निर्बहुलो बहुलं शिति ॥ १६

चित्र ४ चित्रं तिलकमिच्छन्ति चित्रमालेख्यमद्भुतम् । चित्रा २
नक्षत्रं च सुभद्रा च चित्रा चित्रं च कर्बुरम् ॥ १७

बलि ५ बलिः पूजोपहारः स्याद्बलिर्दैत्यो बलिः करः ।
बलिर्जराश्रुथं चर्म जठरावयवो बलिः ॥ १८

विनीत ४ अपनीतं विनीतं स्याद्विनीतो विजितेन्द्रियः ।
विदुर्विनीतं निभृतं विनयग्राहितेपि च ॥ १९

शुक्र ५ देवारातिगुरुः शुक्रः शुक्रौ मासहुताशनौ ।
शुक्रं देहवतां बीजं शुक्रमक्षिरुजं विदुः ॥ २०

गव्य ३ ज्या गव्यं गोहितं गव्यं गव्या गोनिकुर (रु) म्बकम् । गव्या २
रागद्रव्यं च गव्याख्यं गव्यं क्षीरादिकं गवाम् ॥ २१

संभव ३ संभवं मेलकं विद्यादुत्पत्तिरथ संभवः ।
आधारानतिरिक्तत्वमाधेयस्य च संभवः ॥ २२

मणि ४ अलिञ्जरं मणिं विद्यान्मेहनावयवो मणिः ।
रत्नं मणिरजानां च कण्ठदेशस्तनौ मणी ॥ २३

कल्य ४ कल्यं प्रभातं सज्जं च (सज्जितं) कल्यो नीरोगदक्षयोः । कल्या २
कल्याणी वाक्च कन्याख्या कल्या कादम्बरी मता ॥ २४

गुरु ६ गुरुर्महति विख्यातो दुर्वहा (जरा) लघुनोर्गुरु (रुः) ।
गुरुर्निषेकादिकरे पित्रादिसुरमन्त्रिणोः ॥ २५

अक्ष ७ अक्षो रथस्यावयवे पाशकेऽप्यक्षमिन्द्रिये ।
विभीतकेऽक्षः कर्षे च शकटव्यवहारयोः ॥ २६

वृत्त ७ वृत्तं दृढमधीतं च वृत्तं वृत्तिर्मतं तथा ।
चरित्रच्छन्दसोर्वृत्तं निस्तलातीतयोरपि ॥ २७

कृष्ण ५ वर्णः कृष्णो विदुः कृष्णां पिप्पलीं द्रौपदीमपि । कृष्णा २
कृष्णाख्याः शस्त्रकव्यासधनंजयजनार्दनाः ॥ २८

वार्त्त ४ निःसारारोग्ययोर्वार्त्तं नीरुग्वार्तोथ वृत्तिमान् । वार्त्ता ३
कृष्यादाविष्यते वार्त्ता वर्तनोदन्तयोरपि ॥ २९

क्षुद्र ४ अधमक्रूरयोः क्षुद्रः क्षुद्रोऽल्पः कृपणस्तथा । क्षुद्रा ३
क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका ॥ ३०

परिग्रह ५ परिग्रहः परिजने शपथे च परिग्रहः ।
परिग्रहः कलत्रे च मूलस्वीकारयोरपि ॥ ३१

मत्सर २ धनवन्तमदातारं पुरुषं मत्सरं विदुः ।
असोढा परसंपत्तेर्मात्सर्यमपि मत्सरः ॥ ३२

रस ८ शृङ्गारादौ विषे वीर्ये तिक्तादौ द्रवरागयोः । रसा १
पारदे देहधातौ च रसः स्यान्मेदिनी रसा ॥ ३३

वर्ण ९ वर्णो गुणाक्षरयशःशुक्लादिब्राह्मणादिषु ।
वर्णः स्तुतौ कथायां च वर्णः स्याद्वेदरूपयोः ॥ ३४

तल ५ तलश्चपेटस्तालश्च स्वरूपान्ऊर्ध्वयोस्तलम् ।
ज्याघातो ध्रियते येन प्रकोष्ठे तत्तलं मतम् ॥ ३५

करण ५ करणानि हृषीकाणि करणं साधनं विदुः ।
करणाख्या च विज्ञेया कायकायस्थकर्मसु ॥ ३६

पद ९ व्यवसाये परित्राणे पादतच्चिह्नयोरपि ।
वस्तुस्थानापदेशेषु पदं स्याद्वाक्यशब्दयोः ॥ ३७

प्रमाण ५ सम्यक्प्रवक्तृपुरुषे प्रमाणमथ कारणे ।
मर्यादायां प्रमाणाख्या प्रमाणं मानशास्त्रयोः ॥ ३८

वर ४ वरो जामातरि श्रेष्ठे देवतादेरभीप्सिते ।
मनागिष्टे वरं यच्च कश्चिदाह तदव्ययम् ॥ ३९

ताल ३ गीतकालक्रियामाने तालस्तालोथ पादपे ।
तालः करतलेङ्गुष्ठमध्यमाख्यामिते तथा ॥ ४०

तन्त्र ६ प्रधानौषधिसिद्धान्तास्तन्तुवायपरिच्छदौ ।
तन्त्राणि तन्त्रमेकं स्यादुभयार्थप्रयोजकम् ॥ ४१

समय ६ शपथाचारसिद्धान्तान्समयान्संप्रचक्षते
समयः स्यात्क्रियाकारे कालसंकेतयोरपि ॥ ४२

सत्त्व ९ व्यवसाये स्वभावे च पिशाचादौ गुणे बले ।
द्रव्यात्मभावयोः सत्त्वं सत्त्वं प्राणेषु जन्तुषु ॥ ४३

भग ११ ऐश्वर्यस्य प्रयत्नस्य धर्मवीर्ययशः श्रियाम् ।
ज्ञानवैराग्यसूर्याणामिच्छायोन्योर्भगश्रुतिः ( भगः श्रुतिः ) ॥ ४४

दाय ३ विभक्तव्यं पितृ [ स्व ] द्रव्यं दायमाहुर्मनीषिणः ।
यौतकादिधनं दायो दायो दानं च कथ्यते (ऽनमुदाहृतम् )॥४५

अभिपन्न ४ अभिपन्नोपराद्धः स्यादभिपन्नो विपद्गतः ।
अभिपन्नमभिप्रस्तमभिपन्नमभिद्रुतम् ॥ ४६

प्लव ५ क्रमनिम्ने सुवो भागे भेकपक्षिप्रभेदयोः ।
प्लवं विदन्ति विद्वांसः प्लवनोडुपयोः प्लवः ॥ ४७

भाव १२ भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु (योनिषु) ।
क्रियालीलापदार्थेषु विभूतिबुधजन्तुषु ॥ ४८

धर्म ८ स्वभावन्याययागादियमाचारेषु सोमपे ।
प्रचक्षते धर्मशब्दमहिंसाग (सोप) मयोरपि ॥ ४९

वश ४ आयत्ततायामायत्ते प्रभुत्वे च वशं विदुः । वशा
वशाश्चतस्रो वन्ध्या गौः सुता नारी करेणुका ॥ ५०

कल १ कलनाकालशिल्पेषु वृद्धौ मूलधनस्य च । कला
इन्दोरंशे कला ध्यानेऽव्यक्तमधुरे कलः ॥ ५१

काण्ड ८ र [स]होविटपवर्गेषु गर्ह्यपानीययोरपि ।
बाणावसरयोः काण्डं काण्डं नालमपि स्मृतम् ॥ ५२

अरिष्ट ७ तक्रे मरणचिह्ने चारिष्टं वृक्षे च फेनिले ।
सुरायां च शुभेऽपि स्यात्काके निम्बे च पुंस्ययम् ॥ ५३
( तक्रे मरणचिह्ने स्यादरिष्टमशुभे शुभे ।
अरिष्टः कथ्यते काके निम्बफेनिलवृक्षयोः ॥ )

अवहार ३ द्यूतयुद्धादिविश्रामे (न्तौ) ग्राह्याभिख्ये च यादसि ।
निमन्त्रणोपनेतव्यद्रव्ये स्यादवहारवाक् ॥ ५४

तुला ५ गृहाणां दारुबन्धाय पीठिकायां तुलां विदुः ।
तुला पलशते माने भाण्डसादृश्ययोरपि ॥ ५५

पर्वन् ४ दर्शप्रतिपदोः संधौ ग्रन्थिप्रस्तावयोरपि ।
पर्वशब्दं विजानीयाद्विपवत्प्रभृतिष्वपि ॥ ५६

परिकर ५ प्रगाढगात्रिकाबन्धे पर्यङ्कपरिवारयोः ।
प्रयुज्यते परिकरः समहारम्भयोरपि ॥ ५७

जन्य ६ नवोढाया ज्ञातिभृत्या जन्याः स्निग्धा वरस्य च ।
जननीयजनित्रोश्च जन्यं निर्वादयुद्धयोः ॥ ५८

हर्षित ४ जातहर्षे प्रतिहृते विस्मिते च मनीषिभिः । हृष्ट ४
रोमाञ्चविषये हृष्टो हृषितश्च प्रयुज्यते ॥ ५९

चक्र ९ चक्रवाको मतश्चक्रश्चक्रं सेनारथाङ्गयोः ।
राष्ट्रे दम्भप्रभेदेपि चक्रं प्रहरणान्तरे ॥ ६०

मात्र २ परिच्छदाल्पमानेषु धने कर्णविभूषणे । मात्रा ६
अक्षरावयवे मात्रा मात्रं कात्स्न्यैवधारणे ॥ ६१

आत्मन् ७ कलेवरे प्रयत्ने च स्वभावे परमात्मनि ।
स्वान्ते धृतौ मनीषायामात्मानं कवयो विदुः ॥ ६२

संगर ५ संगरः स्यात्क्रियाकारे विपत्तावपि संगरः ।
संगरः संश्रवे युद्धे संगरं तु शमीफलम् ॥ ६३

प्रसव ४ उत्पादः प्रसवो ज्ञेयः प्रसवो गर्भमोचनम् ।
पुष्पं फलं च वृक्षाणां प्रसवं परिचक्षते ॥ ६४

अनुबन्ध ४ दोषोत्पादेऽनुबन्धः स्यात्प्रकृत्यादेर्विनश्वरे ।
मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने ॥ ६५

प्रतिसर ५ आरक्षे मण्डने सूत्रे चमूकाटिनियोज्ययोः ।
पञ्चस्वर्थेषु शब्दज्ञा विदुः प्रतिसरध्वनिम् ॥ ६६

व्यसन ५ विपत्तावशुभे पापे पानस्त्री मृगयादिषु ।
दैवानिष्टफलेऽशक्तौ [ले सक्तौ] व्यसनं कवयो विदुः ॥ ६७

पण ८ ग्लहे माने श्वेतका (वराटा) नां मूल्ये कार्षापणे धने ।
द्यूतादौ कल्पिते चैव बद्धमुष्टौ भृतौ पणः ॥ ६८
( द्यूते विक्रय्यशाकादेर्बद्धमुष्टौ भृतौ पणः ॥ )

भोग ७ पालनेऽभ्यवहारे च निर्वेशे च पणे स्त्रियाः ( पणस्त्रियाः ) ।
भोगः सुखे भुजंगानां(गस्य) शरीरफणयोरपि ॥ ६९

पक्ष ९ केशे पक्षः समूहार्थः पक्षः साध्यविरोधयोः ।
बले काले पतत्रे च रूचौ पार्श्वे विकल्पिते ॥ ७०
( बलकालपतत्रेषु सहायपरिपार्श्वयोः ॥ )

क्षेत्रिय ४ अन्यदेहचिकित्सार्हे क्षेत्रियः क्षेत्रजे तृणे ।
असाध्यरोगे विज्ञेयः क्षेत्रियः पारदारिके ॥ ७१

प्रतिग्रह ५ प्रयुज्यते स्वीकारणे सैन्यपृष्ठे पतद्ग्रहे ।
द्विजेभ्यो विधिवद्देये तद्ग्रहे च प्रतिग्रहः ॥ ७२

शेष २ उपयुक्ताद्भवेदन्यच्छेषं शेषोथ नागराट् । शेषं
प्रसादान्निजनिर्माल्यदातिः शेषेति कीर्तिता ॥ ७३

प्रग्रह ६ प्रग्रहः स्यात्तुलासूत्रे बन्धां (न्दौ) नियमनेपि च ।
धाम्नि योक्त्रे च वृक्षे च सुवर्णहलिसाह्वये ॥ ७४

निष्क ६ अष्टाधिके हेमशते हेम्नि हेमपले तथा ।
उरोविभूषणे निष्कं कर्षदीनारयोरपि ॥ ७५

धातु ८ श्लेष्मादी रसरक्तादिर्महाभूतानि तद्गुणाः ।
इन्द्रियाण्यश्मविकृतिर्धातवो भ्वादिरस्थि च ॥ ७६

(श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः ।
इन्द्रियाण्यश्मविकृतिर्विशेषादस्थि धातवः ॥ ७७ ॥

अर्थ ७ अर्थोभिधेये शब्दानां धनकारणवस्तुषु ।
प्रयोजने निवृत्तौ च विषये च प्रयुज्यते ॥ ७८

पुष्कर ८ मतङ्गजस्य हस्ताग्रे व्योम्नि खड्गफलेम्बुजे ।
जलभेषजयोस्तीर्थे तूर्यवक्त्रे च पुष्करम् ॥ ७९

तीर्थ ९ अवतारे विदुस्तीर्थं पात्रोपाध्यायमन्त्रिषु ।
स्त्रीणां रजसि शास्त्रे च क्षेत्रोपायाध्वरेषु च ॥ ८०

ललाम ललामन् ९ प्रधानध्वजशृङ्गेषु पुण्ड्रवालधिलक्ष्मसु ।
भूषावाजिप्रभावेषु ललामं च ललाम च ॥ ८१

कूट ९ मायादम्भाद्रिशृङ्गेषु सीरावयवयन्त्रयोः ।

अयोधनेऽनृते राशौ निश्चले कूट इष्यते ॥ ८१

रूप ८ ग्रन्थावृत्तौ पशौ शब्दे नाटकादिस्वभावयोः ।
रूपमाकारसौन्दर्ये नाणकश्लोकयोरपि ॥ ८२

क्रिया १० उपायारम्भशिक्षासु निष्कृतौ संप्रधारणे ।
चिकित्साकर्मपूजासु चेष्टाकरणयोः क्रिया ॥ ८३

गो १० गोशब्दः पशुभूम्यंशुवाग्दिगर्थः प्रयुज्यते ।
स्वर्गलोचनबाणाम्बुकुलिशार्थोपि दृश्यते ॥ ८४

साधन २ निवृत्तौ दापने सिद्धौ गतावनुगमे धने ।
उपायमृतसंस्कारवधभेदेषु साधनम् ॥ ८५

गुण १० शुल्बे मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये ।
त्यागशौर्यादिसत्त्वादिसंध्यादिषु गुणः स्मृतः ॥ ८६

हरि १३ इन्द्रचन्द्राश्ववातार्कशकभेकयमाहिषु ।
कपौ सिंहे सुवर्णाभे वर्णे विष्णौ हरिं विदुः ॥ ८७

अन्तर १३ भेदावसरबाह्येषु मध्यावधिविनात्मसु ।
स्थानात्मीयान्यतादर्थ्यरन्ध्रान्तर्धिषु चान्तरम् ॥ ८८

कपिपु ३ भोजनाच्छादने सञ्ज्ञिरुभे कशिपुरिष्यते ।
एकैकशोपि कशिपुं [पू] भोजनाच्छादने विदुः ॥ ८९

रोदसी } ३ द्यावापृथिव्योरेकत्र प्रयोगे रोदसीं विदुः ।
रोदस् } दिवि विश्वंभरायां च रोदसी रोदसा सह ॥ ९०

संसरण ३ आचक्षते संसरणं नगरस्योपनिर्गमे ।
संसारेपि रथादीनामसंबाधगतावपि ॥ ९१

इन्द्राणी ३ इन्द्राणी करणे स्त्रीणां रतिशिल्पकृतात्मनाम् ।
इन्द्राणी सिन्धुवारे च कलत्रे च शतक्रतोः ॥ ९२

कर्णिका ४ बीजकोशे सरोजस्य कर्णिका कर्णभूषणे ।
मता गजस्य हस्ताग्रे कर्णिकाङ्गुलिसंज्ञके ॥ ९३

विषय ५ प्रबन्धाद्यस्य यो ज्ञातः स तस्य विषयः स्मृतः ।
इन्द्रियार्थे जनपदे विषयो गोचरे पदे ॥ ९४

अग्र ५ अग्रं प्रधानमूर्ध्वं च पुरस्तादग्रमिष्यते ।
अग्रमभ्यधिके दृष्टं परिमाणे फलस्य च ॥ ९५

गात्र ३ गात्राणि विदुरङ्गेषु गात्रमुक्तं कलेवरे ।
अप्रजङ्घाविभागे च गजानां गात्रमिष्यते ॥ ९६

पौरुष ३ ऊर्ध्वव्यस्तदोःपाणिनृमाने पौरुषं विदुः ।
भावे कर्मणि विज्ञेयं पौरुषं पुरुषस्य च ॥ ९७

पौरुषेय ४ पुरुषेण कृते कार्ये पुरुषाणां कदम्बके ।
वधे विकारे पुंसश्च पौरुषेयपदं विदुः ॥ ९८

भाग्य ३ भवान्तरकृतं कर्म भाग्यमाहुः शुभात्मकम् ।
अशुभात्मकमप्याहुः केवलं च शुभाशुभम् ॥ ९९

योग ७ योगः संनह(वन)नोपायसंगतिध्यानयुक्तिषु ।
योगोऽपूर्वार्थसंप्राप्तौ योगो विश्रम्भवातिनि ॥ १००

गन्धर्व ५ अन्तराभवसत्त्वे स्याद् गन्धर्वः खेचरे हये ।
गन्धर्वः पशुभेदे च गन्धर्वं गायनं विदुः ॥ १०१

कुतप ४ कुतपो वाद्यविन्यासे दर्भकालप्रभेदयोः ।
छागरोममयं केचित्कम्बलं कुतपं विदुः ॥ १०२

काम ५ कामे(म्ये) निकामे कामाख्या कामश्च मदनेच्छयोः ।
यत्काममभ्यनुज्ञाने तदव्ययमुदाहृतम् ॥ १०३

पिप्पल ३ पिप्पलं सलिलं विद्यात्तरुजातिश्च पिप्पलः ।
वस्त्रच्छेदप्रभेदं च केचिदिच्छन्ति पिप्पलम् ॥ १०४

भोगिन् ३ वैयावृत्त्य(प्रत्य) करो भोगी भोगी राजभुजंगयोः । भोगिनी १
विहाय महिषीमन्या भोगिन्यो राजयोषितः ॥ १०५

निर्वेश ३ निर्वेश उपभोगः स्यान्निर्वेशः कर्मणो भृतिः ।
संमूर्च्छनं च केषांचिन्निर्वेश इति संमतम् ॥ १०६

कुण्ड ३ पतिवत्नीसुतो जारात्कुण्डः कुण्डमुखा मता ।
देवतादेर्जलाधारविशेषः कुण्डसंज्ञकः ॥ १०७

कौलीन ३ अवर्णवादः कौलीनं कौलीनं च कुलीनता ।
कौलीनं विविधं द्यूतं पक्षिभिः पशुभिस्तथा ॥ १०८

काकिणी ३ काकिणी मानदण्डः स्यात्तुरीयांशे पणस्य च ।
काकिणीं ब्रुवते केचिद्रूपमेव वराटकम् ॥ १०९

कौतुक २ पारंपर्योपदेशेन प्रख्याते मङ्गले किल ।
कौतूहले च शब्दज्ञाः कौतुकं संप्रचक्षते ॥ ११०

निकाय ३ एकार्थभाजि संघे च निवासे च निकायवाक् ।
असंहतपदार्थानामेकत्र करणेऽपि च ॥ १११

वनस्पति २ विना पुष्पं फलं यस्य वृक्षस्य स वनस्पतिः ।
प्रयुज्यते प्रयोगज्ञैर्वृक्षमात्रे वनस्पतिः ॥ ११२

ऐरावत २ ऋजुदीर्घं महेन्द्रस्य चापमैरावतं मतम् ।
तस्यैव हस्तिमल्लाख्यो गजोऽप्यैरावतो मतः ॥ ११३

संविद् ९ संभाषणे क्रियाकारे संकेते नाम्नि तोषणे ।
संविदाजौ प्रतिज्ञायामाचारज्ञानयोरपि ॥ ११४

कात्यायनी २ कषायवस्त्रविधवां द्वितीयवयसं स्त्रियम् ।
कात्यायनीं विदुः सन्त उमा कात्यायनी मता ॥ ११५

सरस्वत् २ सरिद्विशेषे सरिति वाचि प्रोक्ता सरस्वती । सरस्वती:३
सरस्वती गवि कापि सरस्वान्वारिधौ नदे ॥ ११६

यम ३ शरीरसाधनापेक्षं नित्यं कर्म यमो मतः ।
यमजश्च यमो ज्ञेयो यमो दक्षिणदिक्पतिः ॥ ११७

परिवेष २ परिवेषं विजानीयादुपसूर्यकमण्डलम् ।
परिवेष्टनमप्याहुः परिवेषं मनीषिणः ॥ ११८

शुद्धान्त २ शुद्धान्तसंज्ञं शब्दज्ञैराख्यातमवरोधनम् ।
कक्षान्तरं च भूपानामसर्वजनगोचरम् ॥ ११९

ऐरावती २
शतह्रदा २ } २ ऐरावतीशतह्रदासौदामन्य इति त्रयम् ।
प्रयुज्यते कविवरैर्विद्युद्विद्युद्विशेषयोः ॥ १२० सौदामनी

नीवी २ नीवीं ग्रन्थिं विदुर्नार्या जघनस्थस्य वाससः ।
धनं चोपचयाजीवैर्मूलं यस्य न हिंस्यते ॥ १२१

परिभाषण ३ परिभाषणमालापो नियमः परिभाषणम् ।
निन्दात्मक उपालम्भः परिभाषणमिष्यते ॥ १२२

अनूचान २ अनूचानं वदन्त्यार्या विनयावनतं नरम् ।
साङ्गे प्रवचनेऽधीती द्विजोऽनूचानसंज्ञकः ॥ १२३

अर्जुन ४ अर्जुनी सौरभेयी स्यादर्जुनं तृणशुक्लयोः । अर्जुनी
अर्जुनो वृक्षभेदे च तथा मध्यमपाण्डवे ॥ १२४

स्थपति ३ बृहस्पतिसवेनेष्ट्रं येनासौ स्थपतिर्मतः ।
प्रासादादिकरः शिल्पी स्थपतिः कञ्चुकी मनः ॥ १२५

दर्श २ अर्थज्ञैरिष्यते दर्शः पक्षान्ते वैदिको विधिः ।
दर्शः सूर्येन्दुसंपर्कादमावास्येति या स्मृता ॥ १२६

गृह्य ३ शाखापुरे विदुर्गृह्यां गृह्यमस्वैरिपक्षयोः । गृह्या
गृह्यान्वदन्ति विद्वांसो गृहासक्तान्मृगाण्डजान् ॥ १२७

चिल्ल २ विज्ञेयं चक्षुषि क्लिन्ने चिल्लं पिल्लं च चुल्लवत् । पिल्ल
चुल्ल २ क्लिन्नाक्षे प्राणिनि प्रोक्तौ चिल्लपिल्लौ सचुल्लकौ ॥ १२८

कक्ष ४ जन्तोरवयवे कक्षः कच्छवीरुत्तृणेषु च । कक्षा
कक्षा स्यात्परिधानस्य पश्चाद्भ्रंशलपाहवे ॥ १२९

दक्षिण ३ संभूतो दक्षिणस्यां यो दक्षिणः स उदाहृतः ।
परच्छन्दानुवर्ती च सरलोऽपि च दक्षिणः ॥ १३०

सैरन्ध्री २ सैरन्ध्री परवेश्मस्था स्ववशा शिल्पकारिका ।
वर्णसंकरजा या च सैरन्ध्री सा प्रकीर्तिता ॥ १३१

अरुण ४ अव्यक्तरागमरुणमरुणः सूर्यसारथिः ।
संध्यारागोऽरुणः क्वापि लोहितोऽरुण इष्यते ॥ १३२

रूप्य ३ आहतं हेमरजतं रूप्यमाहुर्मनीषिणः ।
प्रशस्तरूपको रूप्यो रूप्यं रजतमिष्यते ॥ १३३

गौर २ चामीकराभं शुक्लं च गौरमाहुर्मनीषिणः । गौरी २
असंजातरजाः कन्या गौरी गौरी च पार्वती ॥ १३४

क्ष्वेड २ क्ष्वेडो विषं ध्वनिः क्ष्वेडः क्ष्वेडा शस्त्रं च वैणवम् । क्ष्वेडा २
योधानां सिंहनादोऽपि रणे क्ष्वेडेति कीर्तितः (ता) ॥ १३५

उत्थान ५ उत्थानं गृहवास्त्वन्ते स्यादुत्थानं च पौरुषे ।
उत्थानमुद्यमे तन्त्रे विद्यादुत्थानमुद्भमे ॥ १३६

स्थान २ अवकाशे स्थितौ स्थानं सदम्पन्तमिदं पुनः । स्थाने २
युक्तार्थं कारणार्थं च शब्दतत्त्वविदां मतम् ॥ १३७

हृद्य ४ हृत्प्रियं हृद्भवं हृद्यं हृदयाय हितं च यत् ।
वशीकरणमन्त्रोऽपि वैदिको हृद्य इष्यते ॥ १३८

प्रा-च्-क्, ४ दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगव्ययम् ।

उदच्-क्, ४ प्राच्योदीच्यप्रतीच्यानां वाचकं स्यादनव्ययम् ॥ १३९ प्रत्यच्-क्, ४

पाश ३ खगादिबन्धने पाशः समूहे केशपूर्वकः ।
कर्णपूर्वोऽपि शब्दोऽयं कर्णं वदति शोभनम् ॥ १४०

तार ३ मुक्ताशुद्धौ स्वनेऽत्युच्चे तारस्तारं च रूप्यके । तारा २
नक्षत्रे नेत्रमध्ये च तारा तारवदिष्यते ॥ १४१

अभीक्ष्ण २ पौनः पुन्यं सर्वदा च स्यादभीक्ष्णार्थकं द्वयम् ।
अनव्ययमयं शब्दः कथितो बहुदर्शिभिः ॥ १४२

धारा ३ अश्वानां गतयः पञ्च धारा धारा च संततिः ।
अग्रस्कन्धे च सैन्यस्य धारामाहुर्मनीषिणः ॥ १४३

कंस ४ स्यात्कंसस्तैजसे द्रव्ये पानपात्रे च कांस्यवत् । कांस्य २
दृष्टः कंसो विशेषेण दैत्यमानप्रभेदयोः ॥ १४४

प्रभव ३ स्याज्जन्महेतुः प्रभवः प्रभवो मूलमप्वपाम् ।
प्रभवं केचिदिच्छन्ति स्थानमाद्योपलब्धये ॥ १४५

विरोचन,३ हुताशने निशानाथे सहस्रकिरणे तथा ।
तमोपह, ३ तेमानुदा (दः) समौ दृष्टौ विरोचनतमोपहौ ॥ १४६ तमोनुद् ३

मध्यम ३ गीतस्वरे देहमध्ये मध्योद्भूते च मध्यमः । मध्यमा २
पाणेर्मध्याङ्गुलिर्दृष्टरजाः कन्या च मध्यमा ॥ १४७

प्रत्यय ७ प्रत्ययः प्रथितत्वे स्यात्प्रत्ययो ज्ञानवाचकः ।
प्रत्ययः शपथे रन्ध्रे (स्यादि-) विश्वासाधीनहेतुषु ॥ १४८

धर्मराज १ तथागते धर्मराजजिनबुद्धविनायकाः । बुद्ध १

जिन १ अन्तकेऽर्हति दोषज्ञे गजवक्त्रे क्रमादमी ॥ १४९ विनायक १

निस्तरण २ स्यादुपाये निस्तरणं द्वारं निःसरणं तथा । द्वार २

निःसरण २ तरणे द्वारि निर्याणे (र्वाणे) यथासंख्यमवस्थितम् ॥ १५०

ऋतु २ त्रयं स्त्रीरजसि ज्ञेयमृतुः कुसुममार्तवम् । कुसुम २

आर्तव २ शरदादिषु पुष्पे च ऋतूत्थे च विदुः क्रमात् ॥ १५१
( शरदादिषु पुष्पेषु ऋतूत्थेषु त्रिषु क्रमात् ॥ )

अञ्जनः १ दिग्गजः कज्जलं माता मारुताङ्गभुवः कपेः । अञ्जना १

अञ्जनम् १ यथासंख्यं विनिर्दिष्टमञ्जनोऽञ्जनमञ्जना ॥ १५२

प्रकर १ प्रकरश्चोपकारश्च विकीर्णकुसुमादिषु । उपकार २
संहतौ चोपकृत्यां च यथासंख्यमवस्थितौ ॥ १५३

श्लोकेनैकेन निर्दिष्टं यथाशास्त्रमतः परम् ।
श्लोकस्यार्धेन वक्ष्यन्ते शब्दाः प्रव्यक्तया गिरा ॥ १५४

सूनृत २ प्रियं सत्यं च वचनं सूनृतं सुनृतं शिवम् ।

ब्रह्मन् ५ वेदोऽध्यात्मं तपो ब्रह्म ब्रह्माणौ विप्रवेधसौ ॥ १५५

पिनाक २ स्थाणोर्धनुः पिनाकं स्यात्पिनाकं शूलमात्रकम् ।

काली ३ मातृभेदे स्मृता काली भवानीनवमेघयोः ॥ १५६

दशमीस्थ २ स्थविरे नष्टबीजे च दशमीस्थं द्वयोर्विदुः ।

हेरम्ब २ हेरम्बो महिपः ख्यातो हेरम्बो विघ्ननायकः ॥ १५७

हंस ४ योगिभेदे खगे हंसो निर्लोभनृपसूर्ययोः ।

गण ४ गणः समूहे प्रमथे संख्यासैन्यप्रभेदयोः ॥ १५८

वृन्दारक ३ वृन्दारकं विदुर्देवे मनोज्ञश्रेष्ठयोरपि ।

अभिख्या३ अभिख्या कीर्तिता कीर्तावभिख्या नामशोभयोः ॥ १५९

उत्तर ४ उदीच्यश्रेष्ठयोरूर्ध्वे वाग्भेदे विदुरुत्तरम् ।

ईश ईश ईश्वरवद् दृष्टः प्रभुचन्द्रार्धचूडयोः १६० ईश्वर २

चन्द्र २ उच्यते काञ्चनं चन्द्रं चन्द्रश्च मृगलाञ्छनः ।

पार्ष्णि २ पादग्रन्थरेधः पार्ष्णिः पार्ष्णिः स्याद्वाहिनीकटिः ॥ १६१

लक्ष्मी ३ शोभासंपत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते । श्री ३

भव ५ प्राप्तिसंसारसत्तासु जन्मशंकरयोर्भवः ॥ १६२

उपनिषद्३ धर्मे रहसि वेदान्ते बुधैरुपनिषन्मता ।

दृश् ४ लोचने दर्शने बुद्धौ दृग्दृष्टी दृक्च वीक्षके ॥ १६३ दृष्टि ३

संकुल २ इष्यते संकुलं व्याप्ते विश्लिष्टार्थवचस्यपि ।

अपवर्ग ३ क्रियावसानसाफल्ये मोक्षे त्यागेऽपवर्गवाक् ॥ १६४

लिङ्ग ३ सांख्योक्तप्रकृतौ लिङ्गं लिङ्गं स्याच्चिह्नशेफसोः ।

अभिशस्ति२ अभिशापप्रार्थनयोरभिशस्तिपदं विदुः ॥ १६५

| | | |
|---|---|---|
| कुमार | ४ | युवराजे शिशौ स्कन्दे कुमारोऽश्वानुचारके । |
| सुमनस् | ४ | मालत्यां पण्डिते पुष्पे देवे च सुमनोभिधा ॥ १६६ |
| प्रकृति | ५ | लिङ्गे स्वभावे प्रकृतिः पौरामात्यादियोनिषु । |
| निसर्ग | २ | निर्माणे च स्वभावे च निसर्गः सृष्टिवन्मतः ॥ १६७ सृष्टि |
| शंभु | ३ | शंभुर्रुद्र पिनाकी च शंभुः कमलसंभवः । |
| दर्शन | ४ | लोचने दर्शनं दृष्टं बुद्धिशास्त्रोपलब्धिषु ॥ १६८ |
| कृतान्त | ४ | दैवे कृतान्तः सिद्धान्ते यमाकुशलकर्मणोः । |
| दुरोदर | ३ | त्रयं दुरोदराभिख्यं द्यूतं द्यूतकरः पणः ॥ १६९ |
| वृष | ५ | उक्तः श्रेष्ठास्वधर्मेषु वृषा गोवहशुक्रयोः । |
| तीक्ष्ण | ५ | विषात्मत्यागिनोस्तिग्म तीक्ष्णस्तीक्ष्णं रणायसोः ॥ १७० |
| रजत | ३ | इष्यते रजतः शुक्ले रजतं रूप्यहारयोः । |
| पतङ्ग | ४ | शालिप्रभेदे शलभे पतङ्गः पक्षिसूर्ययोः ॥ १७१ |
| नाग | ४ | काद्रवेयगजौ नागौ नागं सीसकरङ्गयोः । |
| उदुम्बर | २ | उदुम्बरो वृक्षजातिर्देहली स्यादुदुम्बरः ॥ १७२ |
| कलधौत | २ | रजतं कलधौतं स्यात्कलधौतं च काञ्चनम् । |
| पर्जन्य | २ | सध्वानमेघः पर्जन्यः पर्जन्यो मेघवाहनः ॥ १७३ |
| गोविन्द | २ | गोविन्दो भगवान् विष्णुर्गोविन्दोऽधिकृतो गवाम् । |
| रोहित | ३ | ऋजुशक्रधनुर्मत्स्यौ रोहितौ रोहितोऽरुणः ॥ १७४ |
| शक्ति | ३ | उत्साहादौ बले शक्तिः शक्तिं प्रहरणं विदुः । |
| निष्ठा | ५ | निष्ठा निष्पत्तिनाशान्तयाञ्ञानिर्वहणेषु च ॥ १७५ |
| ऋषभ | ३ | गीतस्वरे बलीवर्दे श्रेष्ठे च ऋषभं विदुः । |
| द्रविण, | २ | पराक्रमे च वित्ते च द्रविणं द्युम्नवन्मतम् ॥ १७६ द्युम्न न |
| रङ्ग | ३ | नृत्तयुद्धखले रागे रङ्गो रङ्गं त्रपु स्मृतम् । |
| प्रवाल | ३ | प्रवालो वल्लकीदण्डे विद्रुमे नवपल्लवे ॥ १७७ |

दण्ड ४ दण्डो लगुडमन्थानदमसैन्येषु दृश्यते ।
कोण ३ वीणादिवादनोपाये कोणोऽस्त्रौ(श्रौ) लगुडे तथा ॥ १७८
निर्वृति २ निर्वृतिः स्यादस्तमये सुस्थतायां च निर्वृतिः ।
अनुभाव ३ अनुभावः प्रभावे स्यान्निश्चये भावसूचके ॥ १७९
ककुभ २ वीणाप्रसेवः ककुभः ककुभोऽर्जुनपादपः ।
वराटक २ बीजकोशे सरोजस्य कपर्दे च वराटकः ॥ १८०
अर्क ३ स्फटिके वृक्षभेदेऽर्कः स्यादर्को दिननायकः ।
कण्टक ३ रोमाञ्चे क्षुद्रशत्रौ च तरोरङ्गे च कण्टकः ॥ १८१
पाद ३ पादो भासि तुरीयांशे गिरेः प्रत्यन्तपर्वते ।
हिरण्य ४ मानभेदे धने हेम्नि हिरण्यं स्यादकुप्यके ॥ १८२
प्रधान ३ परमात्ममहाभात्रमनीषासु प्रधानवाक् ।
कौशिक ४ गुग्गुलूलूकशक्राहितुण्डिकेषु च कौशिकः ॥ १८३
उग्र ३ उग्रः शूद्रासुते क्षत्राद्वुग्रावुत्कटशूलिनौ ।
अभिमान ४ गर्वविज्ञप्तिहिंसासु प्रणये चाभिमानवाक् ॥ १८४
सुषिर ३ गर्ते गर्तान्विते वाद्यविशेषे सु(शु)षिरं त्रिषु ।
( गर्ते गर्तान्विते वाद्ये सुषिरं त्रिषु दृश्यते । )
समान ४ एकतुल्यशरीरस्थवायुभेदेषु समानवाक् ॥ १८५
मुख ३ आदावुपाये च मुखं वदनं च मुखं विदुः ।
वर्मन् ३ प्रमाणदेहयोर्वर्म स्यादाकारे च सुन्दरे ॥ १८६
संभ्रम ३ त्रयं संभ्रममिच्छन्ति भयं संवेगमादरम् ।
स्व ४ स्वशब्दो वदति ज्ञातिमात्मीयधनानि च ॥ १८७
द्रव्य ३ भव्यभेषजयोर्द्रव्यं द्रव्यं द्रविणभिष्यते ।
आतङ्क ३ शङ्कायामाहुरातङ्कं रोगसंतापयोरपि ॥ १८८

वाम ३ वामा स्त्री सुन्दरं वामं वामं सव्यप्रतीपयोः । वामा १

प्रग्राह २ हयरश्मौ तुलासूत्रे प्रग्राहः सद्भिरिष्यते ।। १८९

प्रतिष्ठा २ आदृतत्वे प्रतिष्ठा स्यात्प्रतिष्ठा स्थानमात्रके ।

प्रलय ३ प्रलयौ मृत्युसंवर्तौ मूर्च्छायां प्रलयं विदुः ।। १९०

मान ३ मानं प्रमाणे प्रस्थादौ मानश्चित्तोन्नतावपि ।

वर्ष ३ लोकधातौ च वृष्टौ च वर्षं वर्षं च वत्सरे ।। १९१

वारुणी २ वारुणीं मदिरामाहुः पश्चिमा दिक्च वारुणी ।

ज्योत्स्ना २ ज्योत्स्ना ज्योतिष्मती रात्रिर्ज्योत्स्ना चन्द्रमसः प्रभा ।। १९२

दाक्षायणी २ दाक्षायणीं विदुर्दुर्गामश्विन्याद्याश्च तारकाः ।

व्यायाम २ परिश्रमार्थो व्यायामो व्यायामं पौरुषं विदुः ।। १९३

आपन्न २ आपन्नं ब्रुवते प्राप्तमापन्नश्चापदि स्थितः ।

परिगत ३ विज्ञाते वेष्टिते प्राप्ते विदुः परिगतध्वनिम् ।। १९४

धिषण १ धिषणस्त्रिदशाचार्यो धिषणा धीरपि स्मृता । धिषणा १

अनुमति २ ऊनेन्दुपूर्णिमानुज्ञे द्वे अप्यनुमती मते ।। १९५

सौम्य ३ चारुचन्द्रजयोः सौम्यः सोमो यस्य च देवता ।

राका २ पूर्णेन्दुपूर्णिमा राका कन्या जातरजाश्च या ।। १९६

सूचा २ व्यधनेभिनये सूचा सूचनात्प्रयुज्यते । सूचना २

तत, ३ वादित्रे विस्तृते व्याप्ते ततं विततवन्मतम् ।। १९७ विततं ३

तिष्य २ ऋक्षे कलियुगे तिष्यः पुष्यवत्परिकीर्तितः । पुष्य २

चित्रभानु २ सूर्ये वह्नौ चित्रभानुर्विभावसुरिवेष्यते ।। १९८ विभावसु २

क ५ कं वारिशिरसोः कश्च प्रजापत्यात्मवायुषु ।

धूमकेतु ३ उत्पाते ग्रहभेदे च धूमकेतुर्हुताशने ।। १९९

( स्यादुत्पातो धूमकेतुर्धूमकेतुर्हुताशनः )

कीनाश ३ त्रयः कीनाशनामानः कदर्यः कर्षको यमः ।
पुण्य ३ मनोज्ञं सुकृतं धर्मस्त्रयं पुण्यमुदाहृतम् ॥ २००
शिखिन् ४ शिखी हुताशने वृक्षे शिखिनौ केकिकुक्कुटौ ।
कल्प ५ कल्पः शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने ॥ २०१
शमन २ इच्छन्ति वधमर्थज्ञाः शमनं शमनोऽन्तकः ।
उपक्रम ३ उपक्रमश्चिकित्सायामारम्भोपधयोरपि ॥ २०२
कम्बु ३ शम्बूक इष्यते कम्बुः कम्बुर्वलयशङ्खयोः ।
शङ्ख ३ निधिभेदः स्मृतः शङ्खः शङ्खं कम्बुललाटयोः ॥ २०३
ज्यायस् २ प्रशस्यवृद्धतरयोर्ज्यायाञ्ज्येष्ठवदिष्यते । ज्येष्ठ २
वीर्य, ३ बलशुक्रप्रभावेषु वीर्यं तेजश्च कीर्तितम् ॥ २०४ तेजस् ३
ऊर्णायु २ ऊर्णायुरिष्यते मेषे ऊर्णायुर्मेषकम्बलः ।
विमान २ विमानं देवतायाने सप्तभूमे च वेश्मनि ॥ २०५
श्रेयस् ३ धर्मभङ्गलयोः श्रेयः प्रशस्तातिशयेऽपि च ।
पिचण्ड २ पिच(चि)ण्ड उदरे ज्ञेयः पिच(चि)ण्डोऽवयवः पशोः ॥ २०६
ग्रहण ३ त्रयं ग्रहणमिच्छन्ति वन्दीं स्वीकारमादरम् ।
सुरभि ३ मधुमासः सुगन्धिश्च सुरभिः सुरभिश्च गौः ॥ २०७
रुचि ३ अभिष्वङ्गाभिलाषौ च दीप्तिश्च रुचिरिष्यते ।
बिम्ब ३ मण्डले प्रतिबिम्बे च बिम्बं स्याद्बिम्बिकाफले ॥ २०८
मन्द ६ मन्दाः स्थैराल्परोगार्तमूढाभाग्यशनैश्चराः ।
हायन ३ तिसश्च हायनाभिख्या व्रीहिसंवत्सरार्चिषः ॥ २०९
अब्ज ४ अब्जो धन्वन्तरौ चन्द्रे स्यादब्जं शङ्खपद्मयोः ।
ग्रह ४ सूर्यादौ पूतनादौ च राहुनिर्ग्रन्थयोर्ग्रहः ॥ २१०
वत्स ४ पुत्रादौ तर्णके वर्षे वत्सो वत्सं च वक्षसि ।
ख ३ खमिन्द्रिये खमाकाशे खं स्वर्गेऽपि प्रयुज्यते ॥ २११

अवरोह ३ अवरोहोऽवतरणे पादपाङ्गे लतोद्गमे ।
काष्ठा ४ काष्ठा दिक्कालमर्यादाप्रकर्षेषु प्रयुज्यते ॥ २१२
व्युत्थान २ स्वातन्त्र्यकृत्ये व्युत्थानं विरोधाचरणे तथा ।
काच ३ मृद्वेदाक्षिगदौ काचौ काचः शिक्येऽपि दृश्यते ॥ २१३
धामन् ४ तेजोजन्मप्रभावेषु स्मृतं धाम गृहेषु च ।
वरिष्ठ २ वरिष्ठं स्याद् गुरुतमं तथा वरतमं च यत् ॥ २१४
अरुष्कर २ अरुष्करः स्याद् व्रणकृद्भल्लातकमरुष्करम् ।
आशितंभवं २ आशितंभवमन्नाद्यं तृप्तिरप्याशितंभवः ॥ २१५
ज्योतिस् ४ दीप्तितारादुताशेषु ज्योतिर्ज्योतिर्विलोचने ।
कलाप ४ कलापः संहतौ बर्हे काञ्चीतूणीरयोरपि ॥ २१६
शारद ३ शारदौ वर्षशालीनौ प्रत्यग्रं शारदं विदुः ।
प्रामणी ३ पतिप्रधाने ग्रामण्यौ ग्रामण्यं (णीर्) वक्ति नापितम् ॥ २१७
सौरभ्य २ सौरभ्यमाहुः सौगन्ध्यं सौरभ्यं च मनोज्ञता ।
भाण्ड ३ तुरंगाभरणे पात्रे भाण्डं मूलधनिग्धने ॥ २१८
अपभ्रंश ३ पतने स्यादपभ्रंशो भाषाभेदापशब्दयोः ।
पेचक २ उलूकगजलाङ्गलमूलयोरपि पेचकः ॥ २१९
करभ २ कनिष्ठामणिबन्धान्तरो(रु)द्रयोः करभो मतः ।
मार्ग ४ मासान्वेषणयोर्मार्गो मार्गो मृगमदाश्वनोः ॥ २२०
सारङ्ग ३ सारङ्गः शबलो वर्णः सारङ्गावेणचातकौ ।
हस्तिमल्ल २ हस्तिमल्लौ विजानीयादैरावतविनायकौ ॥ २२१
गुच्छ २ स्तबके हारभेदे च गुच्छमिच्छन्ति सूरयः ।
स्थित २ स्थितमूर्ध्वं विजानीयात्प्रतिज्ञानवति स्थितः ॥ २२२
वभ्रु ३ नारायणः स्मृतो वभ्रुर्वभ्रू नकुलपिङ्गलौ ।
पत्त्रिन् ३ श्येनाख्यो विहगः पत्त्री पत्त्रिणौ शरपक्षिणौ ॥ २२३

अपवाद २ अप(व)वादं विदुर्विन्दामप(व)वादो निदेशनम् ।
क्रन्दन २ आह्वानं क्रन्दनं विद्यात्क्रन्दनं रुदितध्वनिः ॥ २२४
धव ३ धवो नरो धवो वृक्षो धवो भर्ता च योषिताम् ।
तमस् ४ ध्वान्तं तमस्तमो राहुस्तमः शोकस्तमो गुणः ॥ २२५
गर्जित २ स्वनो गर्जितमब्दानां गर्जितो मत्तकुञ्जरः ।
कमल ३ कमला श्रीर्जलं पद्मः कमलं कमलो मृगः ॥ २२६ कमला १
गुहा २ पृश्निपर्णी गुहा ज्ञेया गुहा पर्वतगह्वरम् ।
मदकल २ मत्तः करी मदकलो मदेनाव्यक्तवाक्च यः ॥ २२७
समा ३ समा वर्षं समं सर्वं समं साधु समं सदृक् । समा १
क्षण ४ क्षणो व्यापारशून्यत्वे मुहूर्तोत्सवपर्वसु ॥ २२८
उषा २ उषा रात्रिस्तदन्ते च स्यादुषाध्वनिरव्ययम्(यः) ।
बाल ५ बालः केशाञ्जडिम्नेषु ह्रीवेरे गजबालधौ ॥ २२९
शतपत्र २ दार्वाघाटः शतपत्रः शतपत्रं सरोरुहम् ।
एकाग्र २ एकाग्रमेकतानाख्यमेकाग्रं स्यादनाकुलम् ॥ २३०
कलिङ्ग २ भवेत्कलिङ्गो धूम्याटः कलिङ्गं कौटजं फलम् ।
अयन २ अयनं पथि सूर्यस्याप्युदग्दक्षिणतो गतौ ॥ २३१
त्रुटि ४ सूक्ष्मैलायां कालमाने त्रुटिरल्पेपि संशये ।
( त्रुटिरल्पे प्रशस्यते )
पराग ३ पुष्परेणौ परागः स्यात्क्षानीयरजसोरपि ॥ २३२
कद्रु १ नागानां जननी कद्रूः कद्रुः कनकपिङ्गलः कद्रू १
पवन २ पाकस्थानं कुलालस्य पवनं पवनो मरुत् ॥ २३३
शोण ३ शोणः स्याद्रुन्धुजीवाभे नदे लोहितवाजिनि ।
लोहित २ लोहितं रक्तवद् दृष्टं क्षतजारुणयोरपि ॥ २३४ रक्त २

हरिणी ३ सुवर्णप्रतिमामृग्योर्हरिणी हरिता च या ।
अवदात ३ अवदातः सिते गौरे परिशुद्धे च दृश्यते ॥ २३५
तनु ५ तनुस्त्वगल्पकायेषु तनुः स्याद्विरले कृशे ।
आस्था ३ आस्थामालम्बनं विद्यादास्था चास्थानयत्नयोः ॥ २३६
शिपिविष्ट ३ शिपिविष्टः शिवो देवो दुश्चर्मा खलतिश्च यः ।
कट ५ शवे श्रोणौ क(कि)लिञ्जे च गजगण्डे भृशे कटः ॥ २३७
वृजिन ३ वृजिनं किल्बिषे भुग्ने वृजिनश्च शिरोरुहः ।
क्षेत्र ४ केदारे वपुषि क्षेत्रं सिद्धस्थानकलत्रयोः ॥ २३८
कपोत २ पारावतः कपोतः स्यात्कपोतो विहगान्तरम् ।
शिशिर ३ शीतले शिशिरं विद्यात्तुषारऋतुभेदयोः ॥ २३९
करीर ३ वृक्षप्रभेदे कलशे करीरो वेणवाङ्कुरे ।
नेत्र ४ नेत्रं वस्त्रे मथिगुणे तरुमूले त्रिलोचने ॥ २४०
सार्वभौम २ सर्वपृथ्वीपतौ राज्ञि सार्वभौमोथ दिग्गजे ।
रेवती ३ ऋक्षे लाङ्गलिदारेषु रेवत्यास्त्र्याथ मातृषु ॥ २४१
पक्षति २ प्रतिपत्पक्षतिर्ज्ञेया गरुन्मूलेपि पक्षतिः ।
सारस २ सारसो विहगः ख्यातः सारसं सरसीरुहम् ॥ २४२
शर्करा ३ सितोपलायां शकले रोगभेदे च शर्करा ।
जिष्णु ३ शक्रजित्वरयोर्जिष्णुर्जिष्णुर्मध्यमपाण्डवे ॥ २४३
पोत्र २ मुखाग्रं पोत्रमुद्दिष्टं सूकरस्य हलस्य च ।
अष्टापद २ सुवर्णं शारिफलकं द्वयमष्टापदं विदुः ॥ २४४
चषक २ चषकं शी(सी)धु विज्ञेयं चषकं मद्यभाजनम् ।
उपग्रह २ उपग्रहाख्यं द्वितयं स्याद्वन्दिरनुकूलनम् ॥ २४५
श्रेणि २ श्रेणिः समानशिल्पानां संहतिः श्रेणिरावलिः
अर्घ्य २ अर्घार्थं यत्तदर्घ्यं स्यादर्घ्यो यश्चार्घमर्हति ॥ २४६

कल्याण ३ कल्याणं मङ्गलं विद्यात्काञ्चनं च यदक्षयम्
आतिथ्य २ आतिथ्यं स्यादतिथ्यर्थ आतिथ्यमतिथिं विदुः ॥ २४७
( आतिथ्यं यदतिथ्यर्थमातिथ्यमातिथिं विदुः ॥ )
पर्याप्त ४ शक्तौ(क्ते)निवारणे तृप्तौ पर्याप्तं स्याच्चथेप्सिते ।
अत्यय ४ कृच्छ्रे दण्डे च दोषे च नाशे च विदुरत्ययम् ॥ २४८
केतु ३ पताकायां मतः केतुः केतुरुत्पातचिह्नयोः ।
वेधव ३ पर्याहाराध्वभारेषु मतौ विवधवीवधौ ॥ २४९ वीवध ३
जैवातृक २ जैवातृकौ विजानीयादायुष्मन्मृगलाञ्छनौ ।
भुजिष्य २ अनर्धानो भुजिष्याख्यो भुजिष्यः प्रैष्य इष्यते ॥ २५०
विषयिन् २ इन्द्रियं विषयि ज्ञेयं विषयी विषयान्वितः ।
विधि ४ विधौ विधानधातारौ विधिः स्यात्कालदैवयोः ॥ २५१
अवधि ३ अवधौ कालगतौ स्तः सीमानोऽवधयः स्मृताः ।
क्षम ३ क्षमा तितिक्षा पृथ्वी च योग्ये शक्ते हिते क्षमम् ॥ २५२ क्षमा २
समुन्नद्ध २ समुन्नद्धाभिधानौ द्वौ पण्डितंमन्यगर्वितौ ।
अभिजात ३ न्याय्ये कुलीनबुधयोरभिजातपदं विदुः ॥ २५३
आच्छादन २ आच्छादनं संपिधानं वस्त्रमाच्छादनं मतम् ।
आकार २ विदुराकृतिमाकारमाकारो गात्रवैकृतम् ॥ २५४
विष्टर ३ विष्टरः कुशमुष्टौ स्यात्पीठपादपयोरपि ।
भङ्ग २ भेदकल्लोलयोरभङ्गो भङ्गा सस्यं शणाह्वयं ॥ २५५ भङ्ग १
अपदेश ४ अपदेशं विदुर्लक्ष्ये निमित्तव्याजयोस्तथा ।
निगम ३ जानीयान्निगमं वेदे नगरेऽथ वणिक्पथे ॥ २५६
अभिषङ्ग ३ आक्रोशशापाभिभवेष्वभिषङ्गपदं विदुः ।
संनय २ संनयः समवाये स्यात्पृष्ठस्थायिबले तथा ॥ २५७
उष्णीष २ शिरोवेष्टनमुष्णीषमुष्णीषं मुकुटं विदुः ।
किंशारु २ स्याद्गृहिशूकः किंशारुः किंशारुर्विशिखो मतः ॥ २५८

आकर्ष ३ आकर्षः शारिफलके द्यूतपाशकयोरपि ।
सुवर्ण २ सुवर्णमिष्यते सद्भिर्हेमकर्षे च हेम्नि च ॥ २५९
संग्रह ३ संग्रहो बृहदुद्रङ्गे ग्रहसंक्षेपयोरपि ।
कूप ३ गर्तोदपानयोः कूपः कूपः स्याद्रुणवृक्षके ॥२६०
गुल्म ४ सैन्यभेदे रुजायां च गुल्मो विटपवट्टयोः ।
क्षय ४ क्षयो निलयकल्पान्तौ क्षयोपचयरोगयोः ॥२६१
आक्रन्द ३ आक्रन्दः क्रन्दनध्वाने नाथदारुणयुद्धयोः ।
उत्सव ३ अमर्षोत्सेकयोरिच्छाप्रसवेप्युत्सवं विदुः ॥ २६२
आडम्बर ३ आडम्बरः समारम्भे गजगर्जिततूर्ययोः ।
स्थूलोच्चय २ स्थूलोच्चयोप्यसामग्र्ये गजानां मध्यमे गते ॥ २६३
प्रतियत्न ३ संस्कारे प्रतियत्नः स्यादुपग्रहणलिप्सयोः ।
पटु ३ पटुरामयनिर्मुक्तः पटुश्चतुरतीक्ष्णयोः ॥ २६४
वलज ४ क्षेत्रे चारुस्त्रियां सस्ये पूर्द्वारं वलजाभिधा ।
उदार ३ उदारो दातृमहतोरुदारं दक्षिणं विदुः ॥ २६५
शक्करी २ शक्करी छन्दसि ज्ञेया शक्करी मेखला क्वचित् ।
आसुतीवल २ यज्ञा च कल्यपालश्च द्वयं स्यादासुतीवलः ॥ २६६
भेद ३ उपजापो विशेषश्च भेदो भेदो विदारणम् ।
वप्र ४ पितृकेदारयोर्वप्रो वप्रः प्राकाररोधसोः ॥२६७
राजन् ४ राजा नृपः प्रभू राजा राजा क्षत्रियचन्द्रयोः ।
शिशुमार २ शिशुमारा जलोद्भूतजन्तौ तारामयाच्युते ॥ २६८
असृ ३ बाष्पोऽस्र(श्र)मस्रं रुधिरमस्रः शिरसिजः स्मृतः ।
आहत ३ मिथ्योक्तौ ताडिते विद्वादाहते गुणिते तथा ॥ २६९
यादसांपति २ यादसांपतिरम्भोधिः प्रचेता यादसांपतिः ।
कूल २ सैन्यस्य पश्चिमे भागे प्रतीरे कूलमिष्यते ॥ २७०

परीष्टि २ परिचर्या परीष्टिः स्यात्परीष्टिश्च गवेषणे ।

दर ३ दरो भये च गर्ते च किंचिदर्थे दरा(रे)व्ययम् ॥ २७१

पर्यङ्क २ पर्यस्तिकायां पर्यङ्कः पर्यङ्कः शयनं तथा ।

कारा २ कारा बन्धनशालायां कारा बन्धनमात्रके ॥ २७२

मूर्धाभिषिक्त २ मूर्धाभिषिक्तो भूपाले क्षत्रिये च प्रयुज्यते ।

वंश ३ वंशोन्वयः समूहश्च वंशो वंशाश्च वेणवः ॥ २७३

रजस् ३ रजो गुणे रजो रेणुर्योषितामार्तवं रजः ।

आधि ३ आधिं वदन्त्यधिष्ठाने बन्धके व्यसने तथा ॥ २७४

खल ५ खलं भूस्थानकलकेषु पामरक्रूरयोः खलः ।

वृत्तान्त ४ वृत्तान्तः प्रक्रियायां स्यात्कात्स्न्र्ये वार्ताविशेषयोः ॥ २७५.

( कात्स्न्र्यवार्ताविशेषयोः ॥ )

सूत ४ सूतः क्षत्त्राद् ब्राह्मणीजे तक्षिण सारथिबन्दिनोः ।

( सूतः शूद्रात्क्षत्त्रियाजे )

कुण्डलिन् २ कुण्डली भुजगो येन पिनद्धमपि कुण्डलम् ॥ २७६

दिवाकीर्ति २ जनंगमो दिवाकीर्तिर्दिवाकीर्तिश्च नापितः ।

माल्य २ माल्यं सुमनसां माला माल्यं सुमनसोपि च ॥ २७७

गोप ३ ग्रामौघाधिकृते गोपो गोष्ठाध्यक्षेऽथ बल्लवे ।

दक्ष ३ इष्यते चतुरे दक्षस्ताराचूडे प्रजापतौ ॥ २७८

वेग ३ जवे प्रवाहे किंपाके वेगशब्दस्त्रिषु स्मृतः ।

प्रदर ३ रोगप्रभेदे प्रदरः प्रदरः शरभङ्गयोः ॥ २७९

समुदय ३ समुद्गमे समुदयः संग्रामनिकुर(रु)म्बयोः ।

नग २, अग २ नगागौ शिखरीत्येतत्त्रयं पर्वतवृक्षयोः ॥ २८० शिखरिन् २

बाहु ३ बाहुरेव स्मृतो वाहो वाहो मानतुरंगयोः ।

बाण ३ दैत्यमार्गणयोर्बाणो बाणो दासीकुर(रु)ण्टकः ॥ २८१

सादिन् २ सादिनः स्यन्दनारोहा अश्वारोहाश्च सादिनः ।
व्याड(ल)३ भुजगश्वापदक्रूरास्त्रयो व्याडा(ला) इति स्मृताः ॥ २८२
विश् २ विशो भूमिस्पृशो वैश्या विशो भूमिस्पृशो नराः । भूमिस्पृश् २
सालावृक ३ त्रयः सा(शा)लावृकाभिख्याः ध्वस्रृ(शृ)गालवलीमुखाः ॥ २८३
आश्रम २ आश्रमो ब्रह्मचर्यादिराश्रमो मठ इष्यते ।
निराकृति ३ अस्वाध्याये निराकारे प्रत्यादेशे निराकृतिः ॥ २८४
जीवक २ जीवकः क्षपणो ज्ञेयः प्राणदोऽपि च जीवकः ।
माणवक ३ हारभेदे माणवको बाले कुपुरुषे तथा ॥ २८५
निवात ३ आश्रये दृढसंनाहे निवातो वातवर्जिते ।
पुलाक ३ संक्षेपे तुच्छधान्ये च पुलाको भक्तसिक्थके ॥ २८६
कटक ३ राजधान्यां गिरेरङ्के वलये(यं) कटकं विदुः ।
तरल ३ तरलो भास्वरे हारमध्यरत्नेथ चञ्चले ॥ २८७
दव २ वने च वनवह्नौ च दवो दाव इवेष्यते । दाव २
शिल १ शिला द्वाराधरं दारु शिलमुञ्छः शिला दृषत् ॥ २८८ शिला २
कोश ५ पेश्यां दिव्ये धने कोशः कुड्मलासिपिधानयोः ।
नासा २ विज्ञेया नासिका नासा नासा द्वारोर्ध्वदारु च ॥ २८९
अन्ध २ अन्धो दर्शननिर्मुक्तो जन्तुरन्धं तमो मतम् ।
शाकर २ शाकरोऽनडुहि ज्ञेय उक्तं छन्दसि शाक्वरम् ॥ २९०
क्रूर ३ नृशंसकठिनौ क्रूरौ क्रूरं विद्याद् भयंकरम् ।
दृष्टान्त २ दृष्टो दृष्टान्तशब्दोयमुदाहरणशास्त्रयोः ॥ २९१
सत्र ४ सत्रं यज्ञे सदादाने छादनारण्ययोरपि ।
क्षेम २ जानीयान्मङ्गलं क्षेमं क्षेमं लब्धार्थरक्षणम् ॥ २९२
देवन ३ व्यवहारे जिगीषायां क्रीडायामपि देवनम् ।
साल ३ प्राकारवृक्षयोः सा(शा)लः सा(शा)लः सर्जतरुः स्मृतः ॥ २

प्रतिष्कश ३ वार्ताहरे पुरोगे च सहाये च प्रतिष्कशः ।
पत्ति ३ सैन्यभेदे पदातौ च पात्तिः पत्तिर्गतावपि ॥ २९४
पल्लल २ पल्लं तिलमिश्रे(चूर्णे) स्यात्पल्ललं पिशितेपि च ।
बन्धुर २ बन्धुरं सुन्दरे दृष्टं बन्धुरं नम्रवाचकम् ॥ २९५
जगत् २ जगच्चराचरमिव भुवने गतिमत्यपि । चराचर २
प्रतिक्षिप्त २ प्रेषिते स्यात्प्रतिक्षिप्तं प्रतिक्षिप्तं निराकृते ॥ २९६
अनय ३ व्यसनेष्वशुभे दैवे विपत्तावनयस्त्रिषु ।
स्पर्श ४ रुजायां स्पर्शके स्पर्शो दानस्पर्शनयोरपि ॥ २९७
परिवार २ परिवारः परिजने तथा खड्गपिधानके ।
बन्धकी २ पुंश्चली बन्धकी विद्यात्करेणुरपि बन्धकी ॥ २९८
अपाचीन २ विपर्यस्तमपाचीनमपाचीनमपाग्गतिः ।
पक्व २ विनाशाभिमुखं पक्वं पक्वं परिणतार्थकम् ॥ २९९
जीवितेश २ प्रयुज्यते जीवितेशो यमजीवितनाथयोः ।
कनीयस् ३ अत्यल्पयूनोरनुजे कनीयान्स्यात्कनिष्ठवत् ॥ ३०० कनिष्ठ ३
वयस् ३ वयो बाल्यादि पक्षी च यौवनं च वयः क्वचित् ।
लघु ४ शीघ्रे मनोज्ञे निःसारे लघुः स्यादगुरुद्रुमे ॥ ३०१
सवन ३ सोमनिर्दलने स्नाने यजने सवनं मतम् ।
हरा ४ पृथिव्यां वाचि पानीये मदिरायामिरा मता ॥ ३०२
यातयाम २ परिभुक्तोज्झिते जीर्णे यातयामपदं विदुः ।
उच्छ्रित ३ समुन्नते(द्धे) प्रवृद्धे च जाते च विदुरुच्छ्रितम् ॥ ३०३
केवल ३ केवलः कृत्स्न एकश्च केवलश्चावधारितः ।
सत् ५ सत्सत्येभ्यर्हिते साधौ विद्यमानप्रशस्तयोः ॥ ३०४
जाति ५ जातिश्छन्दसि सामान्ये मालतीगोत्रजन्मसु ।
अधर ३ ओष्ठे स्यादधरो हीनमनूर्ध्वमधरं विदुः ॥ ३०५

दृषद् २ दृषन्निषेषणशिला केवलापि शिला दृषत् ।

उपासन २ उपासनं विदुः सेवां वाणाभ्यास उपासनम् ॥ ३०६

शुश्रूषा २ शुश्रूषा श्रोतुमाशंसा शुश्रूषा स्यादुपासनम् ।

संज्ञा ३ नामचेतनयोः संज्ञा सूचनायां करादिभिः ॥ ३०७

पीलु ४ प्रसूनकाण्डयोः पीलुः पीलुः स्याद्गजवृक्षयोः ।

आनर्त्त ३ आनर्त्तो नृत्यशीलायां जन्यै(नि) जनपदान्तरे ॥ ३०८

प्रेत २ मृते भूतान्तरे प्रेतः परेतोऽप्यनयोर्मतः । परेत

कुकुल २ शङ्कुभिर्निचिते श्वभ्रे तुषाग्नौ च कुकूलवाक् ॥ ३०९

प्रतिश्रय २ प्रतिश्रयः सभायां स्यादाश्रयश्च प्रतिश्रयः ।

निर्यूह ४ निर्यासे शम्बरे द्वारे निर्यूहो नागदन्तके ॥ ३१०

समाधि ४ समाधिर्ध्याननीवाकानियमेषु समर्थने ।

घनाघन ३ घनाघनो वर्षुकाब्दे शक्रे समदहस्तिनि ॥ ३११

सिन्धु ३ नदभेदे नदीनां च सिन्धुर्नीरनिधावपि ।

परंपर ५ मृगभेदे च पुत्रस्य प्रपौत्रे च परंपरः ॥ ३१२

व्यलीक ४ व्यलीकमप्रियाकार्यवैलक्ष्ये वृथा पीडने ।

निष्कम २ निष्क्रमो निर्गमे स्थानो बुद्धिसंपदि निष्कमः ॥ ३१३

[illegible] ४ [illegible] निर्वाणोत्साहयोरपि ।

[illegible] २ [illegible] ॥ ३१४

हस्त ३ पाणिनक्षत्रयोस्तिः संघाते केशपूर्वकः ।

निह्नव ३ अविश्वासेऽपलापे च निकृतावपि निह्नवः ॥ ३१५

( विश्वासेऽप्यपलापे च निकृतावपि निह्नवः ॥ )

प्राय ४ मृत्यावनशने प्रायः प्रायो बाहुल्यतुल्ययोः ।

क्षत्तृ ३ क्षत्ता शूद्रात्क्षत्रियाजे सारथिप्रतिहारयोः ॥ ॥ ३१६

अभिजन २ कुले च जन्मभूमौ च विद्यादभिजनध्वनिम् ।
निर्ग्रन्थक २ निर्ग्रन्थकं विजानीयात्क्षपणे निष्परिच्छदे ॥ ३१७
महासन २ महासेनः कार्तिकेये महासैन्यपतावपि ।
आरोह ३ आरोहो योषितां श्रोणौ तरोरङ्के समुच्छ्राये ॥ ३१८
वणिज् २ वाणिज्ये वणिजं विद्यात्तथा वाणिज्यजीविनि ।
विग्रह ३ संग्रामे विग्रहः ख्यातः कायविस्तारयोरपि ॥ ३१९
अनुशय ३ विद्यादनुशयं द्वेषे पश्चात्तापानुबन्धयोः ।
धिष्ण्य ४ स्थाननक्षत्रयोर्धिष्ण्यं विष्ण्योऽग्नौ धिष्ण्यमालये ॥ ३२०
मागध १ मागधी पिप्पलीयूथ्योर्मागधो बन्दिनि स्मृतः । मागधी २
कुसुम्भ २ महारजनं कुसुम्भं कुसुम्भश्च कमण्डलुः ॥ ३२१
जगल २ जगलः पिट्ठमद्यं च भेदको जगलः स्मृतः ।
करक २ कमण्डलुश्च करकः करकश्च घनोपलः ॥ ३२२
परिवाप २ परिवापो जलस्थानं पारेवापः परिच्छदः ।
वारि २ करिणां बन्धनी वारिरम्बु वारीति विश्रुतम् ॥ ३२३
कुमारी २ अयं द्वीपः कुमारी स्यात्कुमारी कन्यका स्मृता ।
वातुल २ वातुलो वातसंघाते वातूलो मारुतासहे ॥ ३२४
पाद २ अङ्घ्रि २ पादाङ्घ्रि(दांघ्रि)चरणा जन्तोरङ्के मूले च भूरुहाम् । [ चरण २
विपणि २ आपणः पण्यवीथी च द्वयं विपणिसंज्ञकम् ॥ ३२५
[illegible] २ [illegible]नीतः कक्षौ कठिने जठरं विदुः ।
श्याम २ [illegible] श्यामा श्यामौ च हरितानिलौ॥३२६ श्यामा २
दुन्दुभि ३ इष्यते दुन्दुभिर्भेर्यामक्षे विन्दुधिकद्वये ॥ ३२७
भिक्षा ४ प्रार्थनाभृतिसेवासु भिक्षा भिक्षितवस्तुनि ।
प्रतीत ३ प्रख्यातज्ञातदृष्टेषु प्रतीतं त्रिषु विश्रुतम् ॥ ३२८

इला ४ इला गोवाग्धरित्रीषु कलत्रे चन्द्रजस्य च ।
गण्डूषा २ गण्डूषा मुखपूर्तौ च गण्डूषा प्रसृतोन्मिते ॥ ३२९
गोष्पद २ गोष्पदं गोपदक्षेत्रे गवां च गतिगोचरे ।
प्रथम २ आदौ प्रधाने प्रथमं प्रमुखेन समं विदुः ॥ ३३० प्रमुख
मृग ४ मृगशीर्षे हस्तिजातौ मृगः पशुकुरङ्गयोः ।
तमिस्रा २ तमिस्रा सतमा रात्रिस्तमिस्रा च तमस्ततिः ॥ ३३१
अरत्नि २ अरत्निः कफणौ हस्ते सप्रकोष्ठतताङ्गुलौ ।
गति ४ उपायो वर्त्म च गतिर्गतिर्यात्रा गतिर्दशा ॥ ३३२
घटा ३ घटा स्याद् घटना गोष्ठी करिणां घटना घटा ।
( करिसंघटने गोष्ठ्यां घटनायां घटा मता । )
कटु ४ रसे(सः) कटुः कटुस्तीक्ष्णे मत्सराकार्ययोः कटुः ॥ ३३३
सुधा ५ गञ्जेष्टिकास्नुहीमूर्वापीयूषेषु सुधा स्मृता ।
परिघ ३ आयुधे परिघः ख्यातः परिघोऽर्गलघातयोः ॥ ३३४
उपह्वर २ उपह्वरं विजानीयान्निःशलाकसमीपयोः ।
लक्ष ३ लक्षं छद्मनि विख्यातं लक्षं संख्याशरव्ययोः ॥ ३३५
गन्ध ३ आमोदलेशयोर्गन्धो गन्धः संबन्धमात्रकः ।
कल्क ४ कल्कः पापाशये दम्भे कल्कं स्यात्पापकिट्टयोः ॥ ३३६
कोष्ठ ३ कोष्ठः कुशूले स्वीये च कुक्षाव(क्षेर)न्तर्गृहस्य च ।
कुश २ कुशा १ कुशो दर्भः कुशी फालः कुशा वल्गा कुशं जलम् ॥३३७ कुशी
उपलब्धि ३ उपलब्धिर्भवेद् बुद्धौ प्राप्तौ ज्ञाने च दृश्यते ।
सार ४ सारो बले स्थिरांशे च न्याय्ये सारं वरे तथा ॥ ३३८
न्युङ्ख २ न्युङ्खः सान्नः पतोद्धारे न्युङ्खः सम्यङ्मनोहरे ।
चटु २ चटुः पिच(चि)ण्डे सपादेरपि सूपवर्णने ॥ ३३९

शृङ्गार २ रसे नाट्यस्य शृङ्गारः शृङ्गारो गजमण्डने ।

भार २ विवधे द्विसहस्रे च पलानां भार इष्यते ॥ ३४०

आचित २ आचितः शकटोन्मेये पलानामयुतद्वये ।

वर्षाभू २ पुनर्नवायां वर्षाभूर्वर्षाभूरपि दर्दुरे ॥ ३४१

अनीकस्थ २ राजरक्षिष्वनीकस्थो रा(ग)जशिक्षाविचक्षणे ।

पुरस्कृत ३ अग्रेकृताभ्यर्चितयोरतिशस्ते पुरस्कृतः ॥ ३४२

वधू ४ नवोढयोषिति वधूः स्नुषाभार्याङ्गनासु च ।

आशय २ आशयं विदुराधारं स्यादभिप्राय आशयः ॥ ३४३

दुर्जात २ दुर्जातं व्यसने प्रोक्तमसम्यग्जातवस्तुनि ।

कुल्य १ कुल्या नदी कुल्यमस्थि कुल्या नीरप्रणालिका ॥ ३४४ कुल्या २

शुण्डा २ कुञ्जराणां करः शुण्डा शुण्डा कादम्बरी मता ( तथा ) ।

अपचिति ४ विवादपचितिं हानौ निष्कृतावर्चने व्यये ॥ ३४५

वैदेहक २ वैदेहको वाणिजके वैश्यतो ब्राह्मणीसुते ।

( वैश्यापुत्रे च शूद्रजे । )

आशिस् २ आशीरभीप्सिताशंसा दंष्ट्राशीरनिलाशिनाम् ॥ ३४६

प्रसिद्ध २ कृतप्रसाधने ख्याते प्रसिद्धं पण्डिता विदुः ।

उदर्क २ उदर्क उत्तरः काल उदर्कः फलमुत्तरम् ॥ ३४७

वेदना २ वेदना स्यादनुभवः पीडायामपि वेदना ।

मेखला ३ मेखला खड्गबन्धे स्यात्काञ्चीशैलनितम्बयोः ॥ ३४८

नाडी ३ कलेवरसिरा नाडी नाडी स्यात्कालनालयोः ।

वक्तव्य ३ वचोर्हे कुत्सितेधीने वक्तव्यं वाच्यवन्मतम् ॥ ३४९ वाच्य ३

आवाप २ प्रक्षेपे चालवाले च विदुरावापमुत्तमाः ।

कलकण्ठ २ कलकण्ठः कोकिलः स्यान्मधुरो यस्य च ध्वनिः ॥ ३५०

खनक २ मूषिकः खनकाभिख्यः खनकश्चावदारकः ।
सरक ३ इक्षुशी(सी)धौ शी(सी)धुपाने सरकं मद्यभाजने ॥ ३५१
ईरण २ निराश्रये महीभागे भवेदीर(दिरि)णमूषरे ।
पाताल २ रसातलं स्यात्पातालं पातालं वडवानलः ॥ ३५२
पारायण २ पारायणं समासङ्गः कात्स्न्र्ये पारायणं स्मृतम् ।
निरूपण २ निरूपणं दर्शने च विचारे च निरूपणम् ॥ ३५३
आराधन २ आराधनं तोषणं स्यात्प्राप्तौ चाराधनं विदुः ।
रसन ३ आस्वादने च रसनं रसनं ध्वनिजिह्वयोः ॥ ३५४
इष्वास २ इषुक्षेपक इष्वास इष्वासो(सं) धनुरिष्यते ।
रीति २ रीतिर्दग्धसुवर्णादिमले स्यादारकूटके ॥ ३५५
अत्याहित २ अत्याहितं महाभीतिर्जीवे च निरपेक्षता ।
अगाध २ अगाधमतलस्पर्शमगाधं विवरं विदुः ॥ ३५६
वान २ स्मृतं शुष्कफलं वानं वानं सीवनकर्म च ।
अनुकर्ष २ रथाधोधरणे दारुण्यनुकर्षोऽनुकर्षणे ॥ ३५७
उत्सर्ग २ उत्सर्गस्त्यागवद्दाने परित्यागे प्रयुज्यते । त्याग २
वीत ३ असाराश्वगजे शान्ते वीतमङ्कुशकर्मणि ॥ ३५८
निर्याण २ निर्याणं द्विरदस्याङ्के निर्याणमथ निर्गमे ।
उपधि २ उपधिं व्याजमिच्छन्ति रथस्यावयवे तथा ॥ ३५९
गोमुख २ लेपने वाद्यभाण्डे च कवयो गोमुखं विदुः ।
भागधेय २ भागधेयं मतं भाग्यं भागधेयं बलिं विदुः ॥ ३६०
बादर २ कार्पासे बादरं विद्याद्बादरं कोलिकाफलम् ।
वार्द्धक ३ वार्द्धकं वृद्धसंघाते वृद्धत्वे वृद्धकर्मणि ॥ ३६१
निरसन २ निधूदने निरसनं निरासे च प्रयुज्यते ।
उपगम २ अङ्गीकृतावुपगमः समीपगमनेऽपि च ॥ ३६२

प्रणीत ३ त्रिषु प्रणीतो विहिते संस्कृतेऽग्नौ प्रवेशिते ।
घनरस २ आचक्षते घनरसं सान्द्रनिर्यासनीरयोः ॥ ३६३
शंवर ३ शंव(शम्ब)रं जलमाख्यातं शंव(शम्ब)रो मृगदैत्ययोः ।
युग ३ युगो रथस्यावयवे कृतादौ युगले युगम् ॥ ३६४
कोल ३ पोत्रिप्लवकयोः कोलः कोलं तु बदरीफलम् ।
( पोत्रिभेलकयोः कोलः कोलं च बदरीफलम् । )
विहायस् २ विदुर्विहायसं व्योम पक्षिणश्च विहायसः ॥ ३६५
वरीयस् २ वरीयानतिविस्तीर्णो वरीयानथ सत्तमः ।
वीथी ४ षड्वक्त्रिवर्त्मगृहाङ्गेषु वीथी वीथी च रूपकम् ॥ ३६६
अभिहार ३ चौर्याभियोगसंनाहेष्वभिहारपदं विदुः ।
काल ५ महाकाले यमे मृत्यौ कालः समयकृष्णयोः २६७
द्वन्द्व ४ रहस्ये कलहे द्वन्द्वं द्वन्द्वं मिथुनयुग्मयोः ।
परिवर्ह २ पार्थिवौपयिकद्रव्ये परिबर्हः परिच्छदे ॥ ३६८
परिवाह २ परिवाहो जलोच्छ्वासे नृपयोग्ये च वस्तुनि ।
अघ ३ अघमंहसि दुःखे च व्यसने स प्रयुज्यते ॥ ३६९
अवग्रह ३ गजालिके वृष्टिरोधे प्रतिघन्धेऽप्यवग्रहः ।
मेचक् ३ जानीयान्मेचकं कृष्णं मेचको बर्हचूडयोः ॥ ३७०
पटल ३ पटलं छदिषि ज्ञेयमक्षिरोगसमूहयोः ।
अपह्नव २ अपह्नवोऽपलापश्च स्नेहश्चापह्नवो मतः ॥ ३७१
कौक्कुटिक २ कौक्कुटिको दाम्भिकश्च यश्चादूरेरितेक्षणः ।
लालाटिक २ लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः ॥ ३७२
हिङ्गुनिर्यास २ हिङ्गुनिर्यासशब्दोऽयं निम्बे हिङ्गुरसेऽपि च ।
पुलक ३ कृमिप्रभेदे रोमाञ्चे पुलकं प्रस्तरे विदुः ॥ ३७३

ब्रह्मबन्धु २ ब्रह्मबन्धुरधिक्षेपे निर्देशे ब्राह्मणस्य च ।
अवष्टब्ध २ अवष्टब्धं द्वयं विद्याददूरमवलम्बितम् ॥ ३७४
समर्थ ३ उक्तः समर्थः संबन्धे समर्थो हितशक्त्योः ।
तल्प ३ शयनीयं विदुस्तल्पं तल्पमट्टकलत्रयोः ॥ ३७५
मन्यु ३ निगदन्ति क्रुधं मन्युं मन्युरध्वरदैन्ययोः ।
स्कन्ध ३ अंसे महीपतौ स्कन्धः समुदायसमूहयोः ॥ ३७६
कवि २ कविर्विद्वान्कविः शुक्रो विज्ञेया खलिना कवि । कवी
अभ्यागम २ अभ्यागमोऽभ्यागमनं बुद्धमभ्यागमं विदुः ॥ ३७७
प्रकाण्ड ३ प्रकाण्डो विटपे शस्ते मूलस्कन्धान्तरे तरोः ।
उपस्पर्शन २ उपस्पर्शनमिच्छन्ति स्नानाचमनयोरपि ॥ ३७८
महामात्र २ समृद्धे स्यान्महामात्रस्तथा हस्तिपकाधिपे ।
गोकर्ण २ गोकर्णो दन्दशूके स्यादङ्गुष्ठानामिकोन्मिते ॥ ३७९
प्रियक २ प्रियकः पीतसारे च मृगभेदे च दृश्यते ।
चूर्ण २ चूर्णानि वासयोगाः स्युश्चूर्णो धूलिः सशर्करा ॥ ३८०
( चूर्णो धूलिरुदाहृतः ॥ ३८० )
तरस्विन् २ तरस्विनो वेगवन्तो बलिनश्च तरस्विनः ।
अन्त ३ स्वरूपप्रान्तयोरन्तमन्तिकेऽपि प्रयुज्यते ॥ ३८१
अणु २ व्रीहावप्यणुलौहित्यौ सूक्ष्मसागरयोः क्रमात् । लौहित्य २
मौलि ३ मौलिः संयतकेशेषु चूडामुकुटयोस्तथा ॥ ३८२
गोलक ३ जारजे विधवापुत्रे गोलको गोलको गुडे ।
अव्यक्त २ अव्यक्तशब्दं जानीयादस्फुटे परमात्मनि ॥ ३८३
कम्बल २ कथ्यते कम्बलः साक्षा प्रावारेऽपि च कम्बलः ।
आसन २ आसनं करिणां स्कन्धः पीठमासनमिष्यते ॥ ३८४

शङ्कु ३ संख्याकीलकयोः शङ्कुः शङ्कुः प्रहरणान्तरे ।
आधार ३ आलवालेऽधिकरणे वाप्यामाधार इष्यते ॥ ३८५
प्रपञ्च २ विपर्यासः प्रपञ्चः स्यात्प्रपञ्चो विस्तरो मतः ।
कुहन १ ईर्ष्यालुर्दम्भचर्या च कुहनः कुहना क्रमात् ॥ ३८६ कुहना १
( ईर्ष्यालौ दम्भचर्यायां )
अकूपार २ अकूपारः समुद्रः स्यादकूपारश्च कूर्मराट् ।
पृषत् २ पृषन्मृगे पृषद्बिन्दौ पृषतोऽप्यनयोर्मतः ॥ ३८७ पृषत् २
अनन्त २ नभोऽनन्तमनन्ता भूरनन्तो नागनायकः । अनन्ता १
( ... ... ... तो नागनायकः । )
संधि ३ संधिर्भगं सुर(रु) ङ्गा च संधिं संघट्टनं विदुः ॥ ३८८
निग्रह २ निग्रहो भर्त्सनाभिख्यो मर्यादां निग्रहं विदुः ।
गन्धवह १ समीरणो गन्धवहो नासा गन्धवहा मता ॥ ३८९ गन्धवाहा १
सत्तम २ जानीयात्सत्तमं श्रेष्ठं साधीयानपि सत्तमः ।
तोक्म २ हरिन्मात्रं च तोक्मं स्यात्तोक्मश्च हरितो यवः ॥ ३९०
ओजस् ४ ओजो बलमवष्टम्भ ओजः स्यात्त्विट्प्रकाशयोः ।
स्पर्शन ३ समीरणे(णः) स्पर्शनाख्या(ख्यः) स्पर्शनं स्पर्शदानयोः ॥ ३९१
उपताप २ उपतप्ते गदे विद्यादुपतापं विचक्षणः ।
भगवती १ ज्ञेया भगवती दुर्गा भगवान्बुद्धपूज्ययोः ॥ ३९२ भगवत् २
शिशुक ३ बालोऽतिमात्रं शिशुकः शिशुकः शिशुमारकः ।
चय २ प्राकारमूलबन्धश्च समूहश्च चयो मतः ॥ ३९३
वेला ३ विकारेऽम्बुनिधेर्वेला कालमर्यादयोस्तथा ।
समापन २ समापनं विनिर्दिष्टं समाप्तिवचयोरपि ॥ ३९४
आयति २ द्वयोरायतिराख्याता प्रभावागामिकालयोः ।
निशमन २ दृष्टे निशमनं धीरैर्दर्शने श्रवणे तथा ॥ ३९५

गर्भ ३ भ्रूणे गर्भं विजानीयाज्जठरार्भकयोरपि ।
अवदान ३ अवदानमितिवृत्ते कर्मखण्डनयोस्तथा ॥ ३९६
उन्माथ ३ पाशयन्त्रकमुन्माथ उन्माथो वधघातयोः ।
भूत ५ भूतं क्ष्मादौ पिशाचादौ न्याय्ये जन्तूपमानयोः ॥ ३९७
तिलक ३ वृक्षप्रभेदे जडुले चित्रके तिलकं विदुः ।
प्रतिपत्ति ४ प्रागल्भ्ये गौरवे प्राप्तौ प्रवृत्तौ प्रतिपत्तिवाक् ॥ ३९८
पत्त्र ३ पर्णवाहनयोः पत्त्रं पत्त्रं पक्षे पतत्त्रिणाम् ।
कूर्च ३ दम्भश्मश्रुमध्ययोः कूर्चः कूर्चः श्मश्रुणि दृश्यते ॥ ३९९
प्राण ३ प्राणोऽसुबलयोरुक्तः प्राणो देहचरोऽनिलः ।
पात्र ३ योग्यभाजनयोः पात्रं पात्रं कूलद्वयान्तरम् ॥ ४००
विधा ५ विधानर्द्धिप्रकारेषु गजान्ने वेतने विधा ।
कौपीन ३ अकार्यगुह्यचीरेषु कौपीनं कवयो विदुः ॥ ४०१
छन्दस् ३ गायत्रीप्रभृति च्छन्दच्छन्दो वेदेच्छयोरपि ।
वितान ४ यागे वितान उल्लोचे शून्यविस्तारयोरपि ॥ ४०२
कोटि ४ अश्रिचापाग्रयोः कोटिः कोटिः संख्याप्रकर्षयोः ।
कक्ष्या ३ मेखलायां स्मृता कक्ष्या गजरज्जुप्रकोष्ठयोः ॥ ४०३
गञ्ज १ भाण्डागारं(रे) विदुर्गञ्जं खनौ गञ्जा सुरागृहे । गञ्जा १
तूवर २ काले प्राप्तेऽग्रशृङ्गो गौर्नरोऽश्मश्रुश्च तूव(प)रः ॥ ४०४
शम्ब २ शम्बः स्यान्मुसलाग्रस्थे लोहमण्डलके पवौ ।
विविक्त ३ विविक्तं रहसि ख्यातमसंपृक्तपवित्रयोः ॥ ४०५
खेट ३ ग्रामभेदे विदुः खेटं कफकुत्सितयोरपि ।
शृङ्ग ३ प्रभुत्वे पर्वताग्रे च शृङ्गमङ्गे पशोरपि ॥ ४०६
पङ्क्ति ३ छन्दोविशेषे लेखायां दशसंख्यासु पङ्क्तिवाक् ।
कण २ धान्यस्यावयवे लेशे कणः स्यात्पिप्पली कणा ॥ ४०७ कणा १

सून १ सूनं पुष्पं वधस्थाने सूना जिह्वातलेपि च । सूना २

रौहिष ४ रौहिषं रक्तकृणं रौहिषो हरिणान्तरम् ॥ ४०८

धर्षण २ धर्षणं सुरतं विद्यादभिभूतिश्च धर्षणम् ।

कपाल २ शिरसोऽस्थि कपालं स्याद् घटादेः शकलं च यत् ॥ ४०९

प्रणाय्य २ अभिलाषविनिर्मुक्ते(क्तः) प्रणाय्यः स्यादसंमते(तौ) ।

सारसन २ मेखलायां सारसनमुरस्त्रे च प्रयुज्यते ॥ ४१०

जटा २ जटा कचविकारे च मुले च धरणीरुहाम् ।

कलहंस २ कादम्बे राजहंसे च कलहंसः प्रयुज्यते ॥ ४११

कमठ २ भाण्डप्रभेदः कमठः कमठः कच्छपो मतः ।

काकोल २ काकोलो द्रोणकाकः स्यात्काकोलो विषमुच्यते ॥ ४१२

करहाट २ पिण्डीतके पद्मकन्दे करहाटपदं विदुः ।
( पुष्पजातौ पद्मकन्दे )

संतति २ तोक २ पुत्रयोः सह संतत्या तोकापत्यप्रसूतयः ॥४१३ अपत्य २ प्रसूति २

विबुध ५ विज्ञेया विबुधा देवा विबुधाः पण्डिता अपि ।

अङ्गज ३ अङ्गजो मन्मथे पुत्रे शोणितं क्वचिदङ्गजम् ॥ ४१४

कर्कश ३ कर्कशः स्यात्साहसिके खरस्पर्शेऽथ निर्दये ।

सामुद्र २ लवणादौ समुद्रस्य सामुद्रं देहलक्षणे ॥ ४१५

पक्ष्मन् ३ पक्ष्म सूत्रादिसूक्ष्मांशे किञ्जल्के नेत्रलोमनि ।

किम् ४ कुत्साप्रश्नवितर्केषु क्षेपे किंशब्द इष्यते ॥ ४१६

सभा ४ सभा सभ्याः सभा गोष्ठी सभा द्यूतं सभा गृहम् ।

विषाण २ विषाणं करिणां दन्तो विषाणं शृङ्गमुच्यते ॥ ४१७

शरण ४ शरणं गृहरक्षित्रोः शरणं रक्षणे वधे ।

पार्श्व २ वक्षोपार्यं विदुः पार्श्वं पार्श्वं चावयवान्तरम् ॥ ४१८

सीमन् ३ आघाटे कथिता सीमा स्थितौ क्षेत्रे च दृश्यते ।
एक ३ एकं श्रेष्ठे विजानीयादन्यकेवलयोरपि ॥ ४१९
बृहती ३ क्षुद्रायां क्षुद्रवार्त्ताक्यां बृहती छन्दसि क्वचित् (स्मृता) ।
तारक २ नक्षत्रे चाक्षिमध्ये च तारकं तारकापि च(यथा) ॥४२० तारका २
कान्त २ प्रियङ्गुयोषितोः कान्ता कान्तः प्रियमनोज्ञयोः । कान्ता २
जाल ४ गवाक्षवृन्ददम्भेषु जालं नत्स्यादिबन्धने ॥ ४२१
सांवित्ति २ सांवित्तिः प्रतिपत्तिः स्यात्संवित्तिरविवादिता ।
जघन्य २ पश्चाद्वाचि जघन्यं स्याज्जघन्यं गर्हितार्थकम् ॥ ४२२
संपराय ३ आपदायतियुद्धेषु संपरायपदं विदुः ।
आलि ३ आलिः सखी सेतुरालिरालिरावलिरिष्यते ॥ ४२३
परिधि २ परिधिर्यज्ञियतरोः शाखायामुपसूर्यके ।
अधिष्ठान३ रथाङ्गाध्यासनपुरेष्वधिष्ठानपदं विदुः ॥ ४२४
धात्री ३ आमलक्युपमाता च धात्री धात्री च मेदिनी ।
श्राद्ध २ हव्यकव्यविधिः श्राद्धं श्राद्धः श्रद्धासमन्वितः ॥ ४२५
वाणिनी ३ नर्तक्यामथ मत्तायां विदग्धायां च वाणिनी ।
तन्त्री २ वीणादीनां गुणस्तन्त्री तन्त्री देहसिरा मता ॥ ४२६
कारिका २ कृतौ विवरणश्लोके यातनायां च कारिका ।
ऊर्णा २ भ्रूमध्यावर्तमेपादिलोम्नोरूर्णा निगद्यते ॥ ४२७
अवतंस २ शेखरे कर्णपूरे स्यादवतंसो वतंसवत् । वतंस
बालिका २ बालायां बालुकायां च बालिकाशब्द इष्यते ॥ ४२८
जघन २ श्रोणिभागे स्त्रियाः पूर्वे जघनं जघनं कटिः ।
नितम्ब २ नितम्बोऽपरस्तस्याः श्रोणिभागः कटिस्तथा ॥ ४२९
समाहित २ समाहितं प्रतिज्ञातं समाधिस्थः समाहितः ।
उद्गूढ २ उद्गूढ ऊढमात्रे स्यादुद्गूढः पृथुलेऽपि च ॥ ४३०

कन्द २ कन्दानि मूलसस्यानि विदुः कन्दांश्च(न्दानि) शूरणान् ।
कृच्छ्र २ आहुः कृच्छ्राणि दुःखानि कृच्छ्रं सांतपनादिकम् ॥ ४३१
दशा ३ दशावस्था दशा वर्तिर्वाससोऽवयवे दशा ।
किष्कु २ सप्रकोष्ठकरः किष्कुर्वितस्तिः किष्कुरिष्यते ॥ ४३२
अवगीत ३ अवगीतं मुहुर्दुष्टे निर्वादे गर्हितेऽपि च ।
तृष्णा,२ तृष२ तृष्णा तृट् तर्ष इत्येते शब्दा लिप्सापिपासयोः ॥ ४३३ तर्ष २
अजिर ३ अजिरं विषये काये विद्याद्जिरमङ्गणम् ।
बीभत्स ३ बीभत्सो विकृते क्रूरे तथा मध्यमपाण्डवे ॥ ४३४
त्वष्टृ २ देवशिल्पिन्यपि त्वष्टा त्वष्टारं वर्धकिं विदुः ।
आनद्ध २ मुरजादिकमानद्धमानद्धं बद्धमात्रकम् ॥ ४३५
निर्यातन३ न्यासार्पणे वैरशुद्धौ दाने निर्यातनं विदुः ।
गन्धन ३ उत्साहने सूचनायां गन्धनं स्यात्प्रकाशने ॥ ४३६
पूर्व ३ पुमांसः पूर्वजाः पूर्वे पूर्वं प्राक् पूर्वमग्रतः ।
अभिनीत३ अभिनीतं संस्कृते च न्याय्ये चामर्षवत्यपि ॥ ४३७
उद्यान ३ प्रयोजने निःसरणे स्यादुद्यानं वनान्तरे ।
व्यञ्जन ४ व्यञ्जनं तेमने चिह्ने श्मश्रुण्यवयवे तथा ॥ ४३८
संस्थान ४ संस्थानमाकृतौ मृत्यौ संनिवेशे चतुष्पथे ।
कुशल ४ कुशलं सुकृते क्षेमे पर्याप्तौ शिक्षितेऽपि च ॥ ४३९
पावन २ स्यात्पावनः पावयिता प्रायश्चित्तं तु पावनम् ।
केतन ३ निमन्त्रणे ध्वजे कार्ये केतनं कवयो विदुः ॥ ४४०
ककुद-द ३ ककुद्वत्ककुदं श्रेष्ठे वृषाङ्गे नृपलक्षणे ।
बीज ३ हेतौ रेतसि बीजं स्याद्बीजमङ्कुरकारणम् ॥ ४४१
फल ५ लाभे सस्ये शराग्रे च्युष्टौ च फलके फलम् ।
धन्वन् ३ स्थलं धन्व धनुर्धन्व धन्वा मरूरपि स्मृतः ॥ ४४२

आगम २　जानीयादागमं शास्त्रं स्यादागमनमागमः ।
प्रणव　प्रह्वे च क्रमनिम्ने च प्रवणः स्याच्चतुष्पथे ॥ ४४३
दृढ ३　दृढं नितान्ते स्थूले च दृढः स्याद्बलवत्यपि ।
औशीर २　औशीरं चामरे दण्डेऽप्यौशीरं शयनासने ॥ ४४४
प्रकोष्ठ २　कक्षान्तरं प्रकोष्ठः स्यात्प्रकोष्ठः कूर्परादधः ।
उपाधि २　उपाधिर्धर्मचिन्तापि कुटुम्बव्यापृतोऽपि च (तावपि) ॥ ४४५
निर्वासन२　निर्वासनं मारणे स्यान्नगरादेर्बहिष्कृतौ ।
उद्धरण २　भुक्तेऽज्झितोन्मूलनयोरुक्त उद्धरणध्वनिः ॥ ४४६
कृत्य २　क्रियादेवतयोः कृत्या कृत्यं विद्विष्टकार्ययोः ।　कृत्या २
नाश ३　निधनानुपलम्भौ च नाशौ नाशः पलायनम् ॥ ४४७
नैगम २　नैगमः स्याद्वाणिजके नैगमो नगरोद्भवे ।
किल्बिष २　पाप्मानं किल्विषं विद्यादपराधेऽपि किल्बिषम् ॥ ४४८
अभिषव ३　सवने मद्यसंधाने स्नानेऽप्यभिषवं विदुः ।
संतान ४　संतानः संततौ देववृक्षे चापत्यगोत्रयोः ॥ ४४९
संस्त्याय २　संघाते संनिवेशे च संस्त्यायं कवयो विदुः ।
अभिपर २　विद्यादभिमरं युद्धे स्वबलादपि साध्वसे ॥ ४५०
आषाढ ३　आषाढो व्रतिनां दण्डे मासि क्षितिधरान्तरे ।
उच्छृत २　उच्छृतं स्यादुत्तुलितं भुक्त्वा चोज्झितमुद्धृतम् ॥ ४५१
विश्वकर्मन् २　देवशिल्पी विश्वकर्मा विश्वकर्मा दिवाकरः ।
अभिमर्द २　अभिमर्दं विदुर्युद्धमभिमर्दोऽभिमर्दनम् ॥ ४५२
निर्देश २　आज्ञा भवति निर्देशो निर्देशः कथनं मतम् ।
मधुक २　बन्दिनो मधुकाः केपि मधुकं मधुयष्टिका ॥ ४५३
अनुत्तर ३　अनुत्तरमनूर्ध्वे स्यादनुदक्श्रेष्ठयोरपि ।
पर ४　आत्मनोऽन्यत्र दूरे च संपन्नश्रेष्ठयोः परः ॥ ४५४

परिमल २ स्याद्विमर्दे परिमलो गन्धे जनमनोहरे ।
पाटल ३ पाटलं कुसुमे वर्णेऽप्याशुत्रीहिश्च(हौ च) पाटलः ॥ ४५५
यापन २ स्याद्यापनं निरसनं यापनं वर्तनं विदुः ।
राजीव ३ राजीवो हरिणो मत्स्यो राजीवं सरसीरुहम् ॥ ४५६
माधव ३ वसन्ते माधवो विष्णौ वैशाखे मासि माधवः ।
प्रसृत २ पाणिर्निकुब्जः प्रसृतः प्रसृतो वेगितः स्मृतः ॥ ४५७
साधी- साधीयो वाढमत्यर्थं साधीयानतिशोभनः । (यस् २
मयूख ३ मयूखः कथितो दीप्तौ ज्वालाकिरणयोरपि ॥ ४५८
अङ्ग ३ उपायगात्रयोरङ्गमङ्गवानङ्ग इष्यते ।
इष्ट २ इष्टं यज्ञेषु यद्दानमिष्टमाशंसितं मतम् ॥ ४५९
चैत्य २ विदुरायतनं चैत्यं चैत्यमुद्देशपादपः ।
लालस २ लालसं प्रार्थनामाहुरौत्सुक्यमपि लालसम् ॥ ४६०
जाङ्गल २ जाङ्गलो निर्जले देशे जाङ्गलं पिशितं विदुः ।
न्युब्ज २ विद्यादधोगतं (मुखं) न्युब्जं न्युब्जः कुब्ज उदाहृतः ॥४६१
हरण २ यौतकद्रविणं प्रोक्तं हरणं हरणं हृतिः ।
वनिता २ उत्पादितानुरागा स्त्रीवनिता वनिताङ्गना ॥ ४६२
विटप ३ शाखायां पल्लवे स्तम्बे विटपं विदुरुत्तमाः ।
विह- पिञ्जनं स्याद्विहननं विदुर्विहननं वधम् ॥ ४६३ (नन २
धवल २ धवलं सुन्दरे शुक्ले धवली गौरपि स्मृता । धवली १
ग्राम २ ग्रामः संवसथे ज्ञेयो वृन्दे शब्दादिपूर्वकः ॥ ४६४
विक्रम २ विक्रमः शक्तिसंपत्तिः क्रांतिमात्रं च विक्रमः ।
उत्थित ३ उत्थितं विदुरुत्पन्ने प्रोद्यते वृद्धिमत्यपि ॥ ४६५
कार्मुक २ शरासने कार्मुकं स्याच्छक्तमात्रे च कार्मुकः ।
अंशुक ३ स्यादंशुकं शुक्लवस्त्रे वस्त्रमात्रोत्तरीययोः ॥ ४६६

गुड २ गुडौ गोलेक्षुविकृती स्नुहीगुडिकयोर्गुडा। गुडा २
विश्रम्भ २ विश्रम्भशब्दमिच्छन्ति विश्वासे प्रणयेऽपि च ॥ ४६७
आत- आतञ्चनं प्रतीवापजवनाप्यायनार्थकम्। (ञ्चन ३
विकृत २ बीभत्सो विकृतो ज्ञेयो विकृतो रोगितेऽपि च ॥ ४६८
जीवा १ ज्या जीवा जीवितं जीवं जीवौ जन्तुबृहस्पती। जीव ३
साधु ३ जानीयाच्छोभनं साधु साधू वार्धुषिसज्जनौ ॥ ४६९
छाया ३ छाया स्यादातपाभावे प्रभाप्रतिमयोरपि।
श्रुति ३ आम्नायं श्रुतिमिच्छन्ति श्रोत्रं तत्कर्म च श्रुतिः ॥ ४७०
हरित् ४ हरित्कक्कुभि वर्णे च तृणवाजिविशेषयोः।
जगती ४ छन्दोविशेषे जगती पृथिव्यां विष्टपे जने ॥ ४७१
स्तन- मेघनिःस्तनिते मेघे स्तनयित्नुं विदुर्बुधाः। (यित्नु २
ग्रहराज २ ग्रहराजं विदुश्चन्द्रं ग्रहराजो दिवाकरः ॥ ४७२
मातृ ३ मातरौ गोजनन्यौ च रेवत्याद्याश्च मातरः।
चपल २ इष्यते चपला विशुश्चपलं लोलशीघ्रयोः ॥ ४७३ चपला १
दीप्त २ दग्धे विभासिते दीप्तं दृष्टं ज्वालितवद् बुधैः। ज्वालित २
समिति ३ सभासंगमयुद्धेषु भाषन्ते समितिं बुधाः ॥ ४७४
सिकता २ सिकता वालुकायां च देशे च सिकतान्विते।
लता २ लता व्रततिराख्याता लता शाखा च शाखिनाम् ॥ ४७५
चिरिण्टी २ स्ववासिन्यां चिरिण्टी स्याद् द्वितीयवयसि स्त्रियाम्।
कुल ४ कुलं सजातीयगणे गोत्रे जनपदे तनौ ॥ ४७६
कौले- सारमेये कुलोद्भूते कौलेयक इति स्मृतः। (यक २
प्रतिभय २ भयंकरं प्रतिभयं भयं प्रतिभयं विदुः ॥ ४७७
अभिग्रह २ अभिग्रहोऽभिग्रहणमभियोगोऽप्यभिग्रहः।
आर्थिन् २ आर्थिनः स्युर्याचनका आर्थिनः सेवका अपि ॥ ४७८

निकृत २ निकृतः स्याद्विप्रकृतो निकृतो विप्रलब्ध(म्भ)कः ।
सृष्ट ४ मुक्तनिर्मितयोः सृष्टं सृष्टं निश्चितभूरिणोः ॥ ४७९
द्वितीया २ द्वितीया कथ्यते जाया द्वितीया पूरणी द्वयोः ।
आरम्भ २ वदन्ति वधमारम्भमारम्भः समुपक्रमः ॥ ४८०
मुक्ति २ निःश्रेयसे मोचने च मुक्तिर्मोक्षवदिष्यते । मोक्ष २
शार्ङ्ग २ धनुर्मात्रं विदुः शार्ङ्गं शार्ङ्गं विष्णोः शरासनम् ॥ ४८१
चन्द्रहास २ चन्द्रहासो रावणासिरासिमात्रे च कुत्रचित् ।
अन्तावसा- अन्तावसायी चाण्डाले नापिते च क्वचिन्मतः ॥४८२ (यिन् २
अपवर्जन २ परित्यागे च दाने च जानीयादपवर्जनम् ।
नियामक २ नियामकाः पोतवाहा नियन्तारो नियामकाः ॥ ४८३
समर्याद २ समर्यादं समीपं च मर्यादासहितं च यत् ।
पिण्डित २ संख्यातं पिण्डितं ज्ञेयं निबिडं पिण्डितं विदुः ॥ ४८४
आस्य २ मुखं मुखान्तरालं च द्वयमास्यमुदाहृतम् ।
सह्य ३ विज्ञेयं सह्यमारोग्यं सह्यौ सोढव्यपर्वतौ ॥ ४८५
छेक २ छेको विदग्धश्छेकाश्च गृहासक्तमृगाण्डजाः ।
आयोधन २ आयोधनं घातनं स्याद्युद्धमायोधनं मतम् ॥ ४८६
पीडा २ उपमर्दं विदुः पीडां पीडामाहुः कृपामपि ।
अणि १ अणिमाग्रिं विजानीयादणिरक्षाग्रकीलकः ॥ ४८७
अध्यक्ष १ प्रत्यक्षं विदुरध्यक्षमध्यक्षोऽधिकृतो मतः ।
अपाङ्ग २ अपाङ्गो लोचनान्तः स्यादपाङ्गस्तिलकेपि च ॥ ४८८
कण्ठ ३ समीपगलशब्देषु त्रिषु कण्ठं विदुर्बुधाः ।
अम्बर ३ सुगन्धिद्रव्यभेदे स्यादम्बरं व्योमवस्त्रयोः ॥ ४८९
काय ३ कायः शरीरे लक्षे च समूहे च प्रयुज्यते ।
कलत्र २ भार्यायां स्त्रीनितम्बे च कलत्रं कवयो विदुः ॥ ४९०

भद्र ४ हस्तिभेदे वृषे भद्रः स्याद् भद्रं साधुशर्मणोः ।
मलय २ आरामे मलयं विद्यात्पर्वतावयवे तथा ॥ ४९१
प्रतिकृति २ बुधा विदुः प्रतिकृतिं प्रतिमाप्रतिकारयोः ।
आयस्त ४ आयस्तः क्लेशिते क्षिप्ते कुपिते तेजिते तथा ॥ ४९२
निदाघ ३ उष्णे स्वेदाम्मसि ग्रीष्मे निदाघो घर्मवन्मतः । घर्म ३
प्रसव्य २ बुधाः प्रसव्यमिच्छन्ति प्रतिकूलानुकूलयोः ॥ ४९३
शाला २ शाला तरुस्कन्धशाखा शाला भवनमिष्यते ।
( शाला तरोः स्कन्धशाखा )
नग्न २ विदुर्दिग्वाससं नग्नं नग्ना वैतालिकादयः ॥ ४९४
कदली २ इष्यते कदली रम्भा कदली वैजयन्तिका ।
वेष्टन २ वेष्टनं मुकुटं विद्यादुष्णीषमपि वेष्टनम् ॥ ४९५
संसिद्धि २ सम्यक्सिद्धिः स्वभावश्च द्वयं संसिद्धिवाचकम् ।
अन्तर्गत २ मध्यप्राप्तं विस्मृतं च द्वयमन्तर्गतं विदुः ॥ ४९६
विशिखा २ प्रतोली विशिखामाहुर्विशिखा च खनित्रिका ।
उचित २ समञ्जसं स्यादुचितमभ्यस्तमुचितं विदुः ॥ ४९७
कल्पन १ कल्पनं कर्तने क्लप्तौ कल्पना गजसज्जना । कल्पना २
पितामह २ पितामहः पितृपिता परमेष्ठी पितामहः ॥ ४९८
अहार्य २ अहार्यं ब्रुवते शैलं यच्च हर्तुं न शक्यते ।
प्राध्व २ प्राध्वोऽतिमात्रं प्रणतः प्राध्वं बन्धनमिष्यते ॥ ४९९
व्यति- व्यसने व्यतिषङ्गे च विदुर्व्यतिकरं बुधाः । (कर २
उपराग २ राहुव्यसनयोरुक्तमुपरागपदं बुधैः ॥ ५००
नन्द्या- नन्द्यावर्ते विदुर्वेश्मप्रभेदे तगरद्रुमे । ( वर्त २
परिवाद २ वल्कीवादनोपाये निर्वादे परिवादवाक् ॥ ५०१
द्यो-दिव् २ द्यौः स्वर्गे नभसि ख्याता द्योशब्दोऽप्यनयोर्मतः ।

शारि २ अक्षोपकरणं शारिः शारिः शकुनिकान्तरम् ॥ ५०२

याप्य २ याप्यं गर्हितमिच्छन्ति याप्यं स्याद्यापनीयकम् ।

प्रतिहत २ प्रतिस्खलितावितिष्टौ मतौ प्रतिहतार्थकौ ॥ ५०३

प्रसूत २ मतं प्रसूतमुत्पन्नं प्रसूतं कुसुमं विदुः ।

सेवक २ प्रसेवः सेवको ज्ञेयः सेवाजीवी च सेवकः ॥ ५०४

आयोग २ गन्धमाल्योपहारे स्यादायोगो व्यापृतावपि ।

कादम्ब २ कादम्बो विशिखो ज्ञेयः कादम्बो विहगान्तरम् ॥ ५०५

सुकृत २ सुकृतं शोभनं कर्म पुण्यं च सुकृतं मतम् ।

हव ३ इष्यते हव आह्वानं हव आज्ञा हवः क्रतुः ॥ ५०६

विष्टि ४ आजूवेतनयोर्विष्टिः कर्मकृत्कर्मणोरपि ।
( विष्टिं कर्मकरे विद्यात्कर्मवेतनयोरपि । )

तपस्विन् २ तपस्वी चानुकम्पार्हे तपस्वी च तपोधने ॥ ५०७

शुक्ति २ मुक्तास्फोटे स्मृता शुक्तिः शुक्तिर्दुर्नामकेऽपि ( मिकापि ) च ।

नाभि ३ प्राण्यङ्गे क्षत्रिये नाभिः प्रधाननृपतावपि ॥ ५०८
( प्रधाने नृपतावपि ॥ ५०८ )

वडवा २ अश्वायां कुम्भदास्यां च वडवा परिकीर्तिता ।

जर्जर २ इन्द्रध्वजे विशीर्णे च जर्जरं परिचक्षते ॥ ५०९

हरि- कुङ्कुमे देववृक्षे च हरिचन्दनमिष्यते । ( चन्दन २

अग्रज- अग्रजन्मा ब्राह्मणे च ज्येष्ठे भ्रातरि च स्मृतः ॥ ५१० (जन्मन् २

द्विजन्मन् २ द्विजन्मा विहगे विप्रे द्विजातिरपि दन्तके । द्विजाति १
( द्विजातिरिव दृश्यते । )

उल्लिखित २ तनूकृतं समुत्कीर्णं द्वयमुल्लिखितं विदुः ॥ ५११

क्षारक २ पक्षिभल्लादिपिटके क्षारकः कोरकेऽपि च ।

गुञ्जा २ वाद्यभाण्डे स्मृता गुञ्जा गुञ्जा स्यात्काकचिञ्चिका ॥ ५१२

पिप्पलक २ स्तनवृन्ते पिप्पलकं तथा सीवनसूत्रके ।
उर्वरा २ उर्वरा सर्वसस्या भूरुर्वरा भूमिमात्रकम् ॥ ५१३
प्रखर २ प्रखरोऽध्वादिसंनाहः प्रखरः स्याद् भृशं खरः ।
स्थासक २ चर्चायां स्थासको ज्ञेयः स(स्फ)रादेरपि बुद्बुदे ॥ ५१४
जयन २ अध्वादीनां च संनाहे जये च जयनं मतम् ।
चिपिट २ खाद्यप्रभेदे चिपिटस्तथा पिच्छि(चि)तविस्तृते ॥ ५१५
सज्जन ३ घट्टाख्ये गुल्मके साधौ सज्जनं सज्जनः क्रमात् ।
परुष २ परुषः कर्बुरो ज्ञेयः परुषं निष्ठुरं वचः ॥ ५१६
संमति २ संमतिः स्यादनुज्ञानमभिलाषोपि संमतिः ।
पालित २ पलितं पाण्डुरः केशः पलितं कर्दमे विदुः ॥ ५१७
विद्ध २ विद्धं सूच्यादिभिर्भिन्ने सादृश्ये च प्रयुज्यते ।
पृथुक २ खाद्यप्रभेदे पृथुकः पृथुकः शिशुकेपि च ॥ ५१८
कुलाय २ कुलायो नीडवद् दृष्टः स्थाने गेहे च पक्षिणाम् । नीड २
उत्कलिका २ विद्यादुत्कलिकाशब्दमुत्कण्ठावीचिवाचकम् ॥ ५१९
ईहामृग २ वृकं रूपकभेदं च द्वयमीहामृगं विदुः ।
कारि २ क्रियायां कारिराख्याता नापितादौ च शिल्पिनि ॥ ५२०
विदारण २ विडम्बने भेदने च विदारणमुदाहृतम् ।
भिन्न ३ संगते दारिते भिन्नं भिन्नमन्यार्थकं विदुः ॥ ५२१
विच्छिन्न २ समालब्धे विभक्ते च विच्छिन्नमभिधीयते ।
विकट २ विशाले विकराले च विकटं कवयो विदुः ॥ ५२२
स्वप्न २ स्वप्नः स्वापे च सुप्तस्य विज्ञाने च प्रयुज्यते ।
निरस्त २ निष्ठ्यूते त्वरितोक्ते च निरस्तमभिधीयते ॥ ५२३
ग्रस्त २ ग्रासीकृतं भवेद् ग्रस्तं ग्रस्तं लुप्तपदं वचः
म्लिष्ट २ अविस्पष्टं वचो म्लिष्टं म्लानं म्लिष्टमुदाहृतम् ॥ ५२४

सनातन २ सनातनः स्मृतो विष्णुः शाश्वतं च सनातनम्।
विश्वस्त १ विश्वासयोग्यो विश्वस्तो विश्वस्ता विधवा मता ॥५२५ विश्वस्ता १
गद २ गदा शस्त्रं गदो व्याधिर्गदो भ्राता च शार्ङ्गिणः। गदा १
पृक्ष २ विज्ञेया पर्कटी पृक्षः पृक्षः पिप्पलपादपः ॥ ५२६
शकुन २ शुभाशंसिनिमित्ते च खगे च शकुनं विदुः।
आभिनि- विसर्जनीयाक्षरयोरभिनिष्टान इष्यते ॥ ५२७ (ष्टान २
संधिनी २ संधिन्यकालदुग्धा गौर्वृषाक्रान्ता च संधिनी।
कङ्कण ३ कङ्कणं मण्डणे सूत्रे कङ्कणं करभूषणम् ॥ ५२८
पलाश ४ राक्षसे किंशुके पर्णे पलाशाख्या हरित्यपि।
प्राणिहित ३ न्यस्ते समाहिते प्राप्ते विदुः प्राणिहितं बुधाः ॥ ५२९
सूद २ व्यञ्जने सूपकारे च सूदः सूपवादिष्यते। सूद २
संपद् २ गुणोत्कर्षे विभूतौ च संपदुक्ता मनीषिभिः ॥ ५३०
अचल १ जानीयादचलां पृथ्वीमचलश्च महीधरः। अचला १
भोगवती २ नागानां नगरीनद्यौ भोगवत्यौ प्रकीर्तिते ॥ ५३१
प्लवंगम २ प्लवंगमः कपौ भेके प्लवगोऽप्यनयोर्मतः। प्लवग २
संनिधि २ प्रत्यक्षे संनिधाने च सांनिधिः परिकीर्तितः ॥ ५३२
उपाहित २ उपाहितोनलोत्पात आरोपित उपाहितः।
विवश २ विवशः स्यादवश्यात्मा विवशोऽरिष्टदुष्टधीः ॥ ५३३
अधिक्षिप्त २ अधिक्षिप्तं प्राणिहिते भर्त्सिते च प्रयुज्यते।
अभाव २ अभावः स्यादसत्तायामभावो निधनार्थकः ॥ ५३४
प्रज्ञा २ प्राज्ञी स्त्री भवति प्रज्ञा प्रज्ञा बुद्धिरुदाहृता।
आसार ३ आसारः स्यात्प्रसरणे वेगाद्वर्षे सुहृद्बले ॥ ५३५
भूयस् २ पुनरर्थेव्ययं भूयो भूयान्बहुतरार्थकः।
परम २ अव्ययं स्यादनुज्ञाने परमं परमः परः ॥ ५३६

उदास्थित २ उदास्थितः प्रतीहारे चरभेदे च कीर्तितः ।
प्रतिमान २ प्रतिमानं प्रतिच्छायागजदन्तान्तरालयोः ॥ ५३७
संख्य १ एकत्वादौ विचारे च संख्या संख्यं च संयुगे । संख्या १
उद्घात २ पादस्खलितमुद्घात उद्घातः समुपक्रमः ॥ ५३८
दिग्ध २ विषलिप्तशरो दिग्धो दिग्धो लिप्तार्थवाचकः ।
प्रार्थित २ प्रार्थितः प्रार्थनालब्धः प्रार्थितं च हतं विदुः ॥ ५३९
कुमुद ३ कुमुदं कैरवे ख्यातं कुमुदौ कपिदिग्गजौ ।
कोकनद १ रक्ताब्जे रक्तकुमुदे बुधैः कोकनदं स्मृ(म)तम् ॥ ५४०
अनेडमूक २ अनेडमूकमिच्छन्ति शठे वाक्श्रुतिवार्जिते ।
प्रवचनीय २ प्रवक्तरि प्रवाच्ये च द्वयोः प्रवचनीयवाक् ॥ ५४१
मदन ४ मधूच्छिष्टे स्मरे वृक्षे वसन्ते मदनं विदुः ।
वामन ३ निखर्वे दिग्गजे विष्णौ वामनः परिकीर्तितः ॥ ५४२
अधिवास २ अधिवासो निवासो स्यात्संस्कारे धूपनादिभिः ।
विहार ३ परिक्रमक्रीडनयोर्विहारः सुगतालये ॥ ५४३
अभिरूप २ अभिरूपप्राप्तरूपस्वरूपा बुधरूपिणोः । (प्राप्तरूप २, स्वरू
कषाय ५ द्रवेङ्गरागे सुरभौ रसे वर्णे कषायवाक् ॥ ५४४
धर २ धरा भूमिर्धरः शैलः कर्पासीतूलको धरः । धरा १
शुल्क २ घट्टे शुल्कं विवाहार्थं जामातुर्गृह्यते च यत् ॥ ५४५
अवतार २ तीर्थेवतरणे विद्यादवतारपदं बुधः ।
पुण्ड्र ३ इक्षुचित्रकयोः पुण्ड्रः पुण्ड्राख्यजनपदानविदुः ॥ ५४६
श्रवण ३ नक्षत्रे श्रवणो ज्ञेयः श्रवणं श्रुतिकर्णयोः ।
सूतक २ पारदाख्ये रसद्रव्ये जनने सूतकं मतम् ॥ ५४७
प्रासाद २ देवाधिवासे प्रासादः प्रासादो नृपवेश्मनि ।
दुकूल २ क्षौमे दुकूलमिच्छन्ति दुकूलं सूक्ष्मवाससि ॥ ५४८

राग ४ रागः क्लेशादिके रक्तौ मात्सर्ये लोहितादिषु ।
मण्डल ३ समूहे मण्डलं बिम्बे देशे द्वादशराजके ॥ ५४९
भास् २ प्रभायां किरणे भासा सममंशुरुदाहृतः । अंशु २
सिक्थ २ मधूच्छिष्टं स्मृतं सिक्थं सिक्थ ओदनसंभवः ॥ ५५०
उत्पतन २ ऊर्ध्वं गमनमुत्पत्तिर्द्वयमुत्पतनं मतम् ।
तिक्त २ शुभगन्धे रसे तिक्तस्तिक्ता स्यात्कटुरोहिणी ॥५५१ तिक्ता १
कल्माष २ सितेतरः स्यात्कल्माषः कल्मांषः कृष्णपाण्डुरः ।
दम २ दमो दण्डः समाख्यातो दम इन्द्रियनिग्रहः ॥ ५५२
लेख २ लेख्यदेवतयोर्लेखो लेखा राजिरुदाहृता । लेखा १
प्रविदारण २ प्रविदारणमाख्यातं विद्वद्भिर्दारणे रणे ॥ ५५३
विष्कम्भ २ विस्तारे प्रतिबन्धे(बिम्बे) च विष्कम्भः समुदाहृतः ।
अवध्वस्त ३ समुज्झिते निन्दिते स्यादवध्वस्तोऽवचूर्णिते ॥ ५५४
आपात २ पतने च तदात्वे च विदुरापातमुत्तमाः ।
प्रवाह २ प्रवाहशब्दमिच्छन्ति प्रवृत्तिजलवेगयोः ॥ ५५५
आप्लुत २ आप्लुतः स्नातको ज्ञेय आप्लुतः स्नातमात्रके ।
आत्मयो- आत्मयोनिर्मतो वेधा आत्मयोनिर्मनोभवः ॥ ५५६ (नि २
भूमि २ पृथिव्यां स्थानमात्रे च भूमिर्भूरिव दृश्यते । भू २
गोप्य २ गोपनीयं भवेद् गोप्यं गोप्या दासस्य सूनवः ॥ ५५७
संस्कार २ संस्कारशब्दमिच्छन्ति संकल्पप्रतियत्नयोः ।
प्रवचन २ विद्याप्रवचनं वेदे प्रकृष्टवचनं च यत् ॥ ५५८
मञ्जुल २ मञ्जुलो मधुरे ख्यातो जलरङ्कुपतत्रिणि ।
आकर २ आकरो निकरो ज्ञेय उत्पत्तिस्थानमाकरः ॥ ५५९
रौहिणेय २ रौहिणेयो बुधो ज्ञेयो रौहिणेयो हलायुधः ।
संघर्ष २ संघ(ह)र्षशब्दमिच्छन्ति स्पर्धायां घर्षणेपि च ॥ ५६०

| | | |
|---|---|---|
| वालक | २ | वालकं कटकं विद्याद्ङ्गुलीयं च वालकम् । |
| परायण | २ | परायणमभीष्टं स्यात्तत्परश्च परायणः ॥ ५६१ |
| विद्रुम | २ | समुद्रोत्थे प्रवालाख्ये रत्ने वृक्षे च विद्रुमः । |
| सहज | २ | निसर्गे च सहोत्थे च सहजं पण्डिता विदुः ॥ ५६२ |
| प्रतिशिष्ट | २ | प्रत्याख्याते प्रेषिते च प्रतिशिष्टपदं विदुः । |
| उपोढ | २ | उपोढमूढमात्रेपि समासन्नेपि कीर्तितम् ॥ ५६३ |
| आक्षेप | २ | आकर्षणं स्यादाक्षेपः स्यादाक्षेपश्च भर्त्सनम् । |
| साहस | २ | बलात्कारकृतं कर्म साहसं साहसं दमः ॥ ५६४ |
| पित्सत् | २ | पतनेच्छौ विहंगे च पित्सन् पिपतिषन्यथा । पिपतिषत् = |
| जिगीषा | २ | जिगीषा जेतुमिच्छायां व्यवसाये च दृश्यते ॥ ५६५ |
| पशु | ३ | पशुर्मृगादौ छगले पशु दृश्यार्थमव्ययम् । |
| बहु | २ | विपुले ऽयादिसंख्यासु बहुशब्दः प्रयुज्यते ॥ ५६६ |
| आकलन | २ | बन्धने कलनायां च विदुराकलनं बुधाः । |
| स्तनन | २ | स्तननं क्रन्दनध्वाने ध्वानमात्रे च कीर्तितम् ॥ ५६७ |
| कञ्चुक | ४ | कवचे वारबाणे च निर्मोके चापि कञ्चुकः । |
| पूर्णपात्र | २ | वर्धापके पूर्णपात्रं पात्रे पूर्णे जलादिना ॥ ५६८ |
| लक्ष्मी-वैदेही | २ | लक्ष्मीपतिर्वासुदेवे भूमिपालेच दृश्यते । (पति = वैदेही पिप्पली प्रोक्ता वैदेही जनकात्मजा ॥ ५६९ |
| अभीक | २ | आभिकामयिताऽभीकः स्यादभीको भयोज्झितः । |
| नत | २ | नतं बन्धुरमिच्छन्ति नतं कुटिलवाचकम् ॥ ५७० |
| ययु | २ | ययुः स्यादस्यमेधाश्वो ययुरश्वोपि केवलः । |
| ताम्र | २ | वर्णप्रभेदे शुल्बे च ताम्रशब्दं विदुर्बुधाः ॥ ५७१ |
| उषस् | २ | उषसं ब्रुवते संध्यामुषः प्रत्यूषवाचकम् । |
| आग्रह | २ | आग्रहोनुग्रहे दृष्ट आसक्तिग्रहयोस्तथा ॥ ५७२ |

द्वीपवत् २ द्वीपवत्यः स्मृता नद्यौ द्वीपवानम्बुधौ नदे। द्वीपवती १
कुसीद २ कुसीदिकः कुसीदः स्यात्कुसीदं वृद्धिजीवनम् ॥ ५७३
प्रतीक २ प्रतीकोवयवे ख्यातः प्रतीपेपि क्वचिन्मतः।
क्षिति २ क्षये निवासे मेदिन्यां क्षितिशब्दाश्विषु स्मृतः ॥ ५७४
पिण्याक २ पिण्याकस्तिलकल्के च सिह्लकेपि प्रयुज्यते।
सोमवल्क २ कट्फले शुक्लखदिरे सोमवल्क उदाहृतः ॥ ५७५
श्रीपर्ण २ श्रीपर्णमग्निमन्थाख्ये(ख्यं) पादपे कमलेपि च।
भूतिक ३ भूनिम्बे भूस्तृणे प्रोक्तं भूतिकं कत्तृणे तथा ॥ ५७६
विधूत २ विधूतं कम्पिते त्यक्ते धूतमप्यनयोर्मतम्। धूत २
अवसित २ अवसानगते ज्ञाते विद्यादवसितध्वनिम् ॥ ५७७
अवलेप २ गर्वलेपनयोरुक्तमवलेपपदं बुधैः।
क्षेप २ क्षेपणे चावहेले च क्षेपशब्दः प्रयुज्यते ॥ ५७८
प्रतिपादन २ बोधने च प्रदाने च प्रतिपादनमिष्यते।
लूता २ लूताशब्दं विजानीयादूर्णनाभे पिपीलिके ॥ ५७९
घोष ६ गोपपल्ल्यौ स्वरे घोषो मेघादेरपि निस्वने।
नियम ४ यन्त्रणायां प्रतिज्ञायां नियमो निश्चये व्रते ॥ ५८०
गिरि ४ गीर्णौ गिरियके(क-) क्रीडागुडके पर्वते गिरिः।
अण्डज ३ कृकलासः खगो मीनस्त्रयमण्डजसंज्ञकम् ॥ ५८१
ब्राह्मण्य २ ब्राह्मण्यं ब्राह्मणत्वे च समूहे च द्विजन्मनाम्।
निकार २ निकारः परिभावे च धान्यस्योत्क्षेपणेपि च ॥ ५८२
तर्क २ वितर्काद्ऊक्षयोस्तर्कस्तर्क ऊह उदाहृतः।
विजृम्भित २ विजृम्भितं विकसिते चेष्टायां च विजृम्भितम् ॥ ५८३
विवर २ विवरन्छिद्ररन्ध्रादीनाहुर्दूषणगर्तयोः। (छिद्र २, रन्ध्र २
महाकाल ३ प्रयुञ्जते महाकालं किंपाके प्रमथेऽपि च (शिवे) ॥ ५८४

| | | |
|---|---|---|
| अर | ३ | अरमङ्गे रथाङ्गस्य शीघ्रशीघ्रगयोरपि । |
| उद्ग्राहित | २ | बद्धग्राहितयोरुक्तमुद्ग्राहितपदं बुधैः ॥ ५८५ |
| दर्शक | २ | स्यादर्शको दर्शयिता प्रतीहारश्च दर्शकः । |
| अन्तिक | १ | समीपमन्तिकं विद्यादन्तिकां चुल्लिकामपि ॥५८६ अन्तिका १ |
| आवेशन | २ | स्यादावेशनमावेशे शालायामपि शिल्पिनाम् । |
| आस्क- | | विदुरास्कन्दनं युद्धमास्कन्दं च विचक्षणाः ॥ ५८७ (न्दन २ |
| चोद्य | २ | विस्मये चोदनार्हे च चोद्यमाहुर्मनीषिणः । |
| विषाणिन् | २ | विषाणिनः स्युः करिणः शृङ्गिणश्च विषाणिनः ॥ ५८८ |
| विश्लेष | २ | विश्लेषवदयोगः स्याद्वियोगे विधुरे तथा । अयोग २ |
| गाण्डिव | २ | जिष्णोर्धनुषि कोदण्डे गाण्डीवं गाण्डिवं यथा॥५८९(गाण्डीव२ |
| योग्य | २ | प्रवीणोपायिनौ योग्यौ योग्यामभ्यसनं विदुः । योग्या १ |
| वर्णक | २ | विलेपने चन्दने च शब्दज्ञैर्वर्णकः स्मृतः ॥ ५९० |
| विश्रब्ध | २ | विश्रब्धशब्दमिच्छन्ति विश्वस्तानुद्भटार्थकम् । |
| अधीय | २ | स्यादध्हितमधीयमधीयं चाध्यसंहतिः ॥ ५९१ |
| निषध | ४ | निषधः कठिने देशे तद्राजे पर्वतान्तरे । |
| कश्य | ३ | कश्यं मद्ये कशार्हे च हयमध्ये च दृश्यते ॥ ५९२ |
| दिष्टि | २ | आनन्दे परिमाणे च दिष्टिं बहुविदो विदुः । |
| वर्ति | ३ | दीपे दीपदशायां च वर्तिर्गात्रानुलेपने ॥ ५९३ |
| गुप्ति | ३ | गुप्तिः कारा च रक्षा च जी(दी)र्णं च विवरं भुवः॥ ५९४ |

विभक्तिप्रविभागेण नानारूपैरतः परम् ।
श्लोकपादैः प्रवक्ष्यन्ते शब्दाः श्रुतिसुखावहाः ॥ ५९४

केशव २ केशवौ केशवत्कृष्णौ चक्रिणौ सर्पशार्ङ्गिणौ । चक्रिन् २
वेधस् २ वेधसौ हरिधातारौ विधू विष्णुनिशाकरौ ॥ ५९५ विधु २
विवस्वत् २ देवसूर्यौ विवस्वन्तौ खगावादित्यपक्षिणौ । खग २
भानु २ भानू दीप्तिदिनकरौ प्रभुतिग्मरुचाविनौ ॥ ५९६ इन २
वृषाकपि २ वृषाकपी विष्णुशिवौ भीमौ शिवभयानकौ । भीम २
स्वामिन् २ स्वामिनौ गुहभर्तारौ मरुतौ पवनामरौ ॥ ५९७ मरुत २
मुण्ड २ मुण्डौ मुण्डितमूर्धानौ शारौ शबलमारुतौ । शार २
अनिमिष २ सुरमत्स्यावनिमिषौ सिद्धार्थौ बुद्धसर्षपौ: ॥ ५९८ सिद्धार्थ २
श्लोक २ श्लोकौ यशोवृत्तबन्धौ प्राणोद्योगौ पराक्रमौ । पराक्रम २
वल्लभ २ वल्लभौ दयिताभ्यक्षौ मधुरौ स्वादुशोभनौ ॥ ५९९ मधुर २
